CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीमदप्पयदीक्षित-चरितम्

रचयिता
डॉ० हरिनारायणदीक्षितः
व्याकरणाचार्यः, सांख्ययोगाचार्यः, साहित्याचार्यः,
एम० ए०, पीएच० डी०,
संस्कृत-विभागाध्यक्षः
कुमायूँविश्वविद्यालयः, नैनीतालः (उ० प्र०)

१९८१

प्रकाशिका
देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५९
(भारतम्)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीमदप्पयदीक्षितचरितस्य
रचयितुः संक्षिप्तः परिचयः

नाम डॉ० हरिनारायणदीक्षितः
पितृनाम श्रीरघुवीरसहायदीक्षितः
जन्मस्थानम् जालौनमण्डलान्तर्गत 'पड़कुला' ग्रामः (उ०प्र०)।
जन्मतिथिः १३-१-१९३६ ई०
शिक्षा व्याकरणाचार्यः सांख्ययोगाचार्यः, साहित्याचार्यः (वाराणसेय संस्कृत-विश्वविद्यालयतः), एम०ए० (संस्कृते) पीएच०डी० (संस्कृते) (आगराविश्वविद्यालयतः), साहित्यरत्नम् (हिन्दी संस्कृतयोः) (हिन्दी-साहित्य सम्मेलनप्रयागतः)।

(पृष्ठभागे सम्बद्धः)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीमदप्पयदीक्षित-चरितम्

रचयिता
डॉ० हरिनारायणदीक्षितः
व्याकरणाचार्यः, सांख्ययोगाचार्यः, साहित्याचार्यः,
एम० ए०, पीएच० डी०
संस्कृत-विभागाध्यक्षः
कुमायूँविश्वविद्यालयः, नैनीतालः (उ० प्र०)

प्रकाशिका
देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५६
(भारतम्)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रचना : श्रीमदप्पयदीक्षितचरितम् (गद्यकाव्यम्)
रचयिता : डॉ० हरिनारायणदीक्षितः
प्रकाशिका : देववाणी-परिषद्, दिल्ली
आर ६, वाणी-विहारः, नयी दिल्ली-११००५९
(भारतम्)
मुद्रकः : देववाणी प्रिण्टर्स
WZ-A/147, उत्तम नगर, नयी दिल्ली-५९
संस्करणम् : प्रथमम्, १९८१
प्रतिरूपाणि : ३५०
© लेखकः
मूल्यम् : विंशतिः रूप्यकाणि रु० २०-००

ŚRĪMADAPPAYADĪKṢITACARITAM (Prose)
Author : Dixit, (Dr.) Hari Narayana
Publisher : Devavani Parishad, Delhi
R-6, Vani Vihar, New Delhi-110059.
Printer : Dev Vani Printers
WZ-A/147, Uttam Nagar, New Delhi.-59
Edition : First, 1981
Copies : 350
© : Author
Price : Rs. 20-00 (Rs. Twenty only).

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

समर्पणम्

भक्तिज्ञानस्वरूपाय
द्वैताद्वैतमनीषिणे ।
कृतिने दीक्षितेन्द्राय
कृतिरेषा समर्प्यते ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अनुक्रमणिका

समर्पणम्	३
प्रास्ताविकम्	५-६
पूर्वभूमिः	७-८
श्रीमदप्पयदीक्षितचरितम्	(९-५६)
श्रीदीक्षितस्य पूर्वजाः	९-११
श्रीदीक्षितस्य जन्म	११-१२
श्रीदीक्षितस्य नाम	१२-१३
श्रीदीक्षितस्य अनुजोऽनुजा च	१३-१४
श्रीदीक्षितस्य शिक्षादीक्षे	१४-१६
पितृ-विरहः	१६-१९
श्रीदीक्षितस्य गार्हस्थ्ये प्रवेशः	१९-२३
श्रीदीक्षितस्य सर्वतोमुखी प्रतिभा	२३-२५
कर्मकाण्डप्रकाण्डता	२६
राजसम्मानोपलब्धयः	२७
श्रीदीक्षितस्य असूयालुः शत्रु	२७-३७
श्रीदीक्षितस्य शरणागतशत्रुवात्सल्यम्	३७
श्रीदीक्षितस्य सन्ततयः	३८
श्रीदीक्षितस्य शिष्यप्रीतिः	३८-४०
श्रीदीक्षितस्य दार्शनिकता	४०-४४
श्रीदीक्षितस्य दानशीलता	४४-४५
श्रीदीक्षितस्य विलक्षणचमत्कारिता	४५-४७
श्रीदीक्षितस्य विरचितग्रन्थाः	४७-४८
ग्रन्थनिर्माणपरिस्थितयः	४८-५०
श्रीदीक्षितस्य तीर्थस्थानावलोकनशीलता	५०
श्रीदीक्षितेन्द्रनिर्वाणम्	५१-५५
श्रीदीक्षितस्य वंशवृक्षः	५५-५६

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रास्ताविकम्

'देववाणी-परिषद्, दिल्ली' संस्थायाः सद्ग्रन्थप्रकाशनरूपमप्येकमुद्देश्यमस्ति। तदनुसारमद्यावधि परिषदा इमे संस्कृतभाषानिबद्धा ग्रन्थाः प्रकाशिताः—(१) **सुगमरामायणम्** (आचार्यश्रीरमेशचन्द्रशुक्लप्रणीतं महाकाव्यम्,) (२) **श्रीकृष्णचरितम्** (आचार्यश्रीरमेशचन्द्रशुक्लप्रणीतं महाकाव्यम्.) (३) **कर्णभूषणम्** (डॉ० सो० आर० स्वामिनाथ-कृतं नाटक-शोकगीतिप्रबन्धात्मकं रचनात्रयम्), (४) **अर्वाचीनसंस्कृत–महाकाव्यविमर्शः** (रमाकान्तशुक्लसम्पादितः खण्डद्वयात्मकः समीक्षाग्रन्थः) (५) **हरविजयस्य साहित्यिकमध्ययनम्** (डॉ० कृष्णकान्तशुक्ललिखितम्)। इदानीं च साहित्याचार्य-व्याकरणाचार्य-सांख्ययोगाचार्य-एम० ए०-पीएच० डी०-प्रभृत्युपाधिविभूषितस्य नैनोतालस्थकुमायूँ विश्वविद्यालये संस्कृत-विभागाध्यक्षस्य श्रीहरिनारायणदीक्षितमहाभागस्य **'श्रीमदप्पयदीक्षितचरितम्'**—इत्यभिधानेयं रचना विदुषां पुरतः प्रस्तूयते। इतः पूर्वमियं रचना देववाणी-परिषदा १५.१.१९८१ तारिकायां प्रकाशिते **'अर्वाचीनसंस्कृते'** त्रैमासिकपत्रे प्रकाशिता बभूव। इदानीं च स्वतन्त्रग्रन्थरूपेण सहृदयानां पुरः समायाति।

रचनेयं गद्यकाव्यम् उताहो चम्पूकाव्यम्? निबन्धश्चरितकाव्यं वा? कथा आख्यायिका वा? इतिहासः कल्पना वा? अत्र कीदृशः कथावस्तुप्रवाहः? कीदृशी अत्र भाषा? कीदृशी अत्र शैली? कश्चात्र सन्देशः? इत्यादिप्रश्नाः समालोचकपुङ्गवैरेव समाधेयाः सन्ति; न तत्रास्माकं कश्चिदभिनिवेशः। अस्माभिस्तु केवलमिदमेव क्रियते यन्नवीनो रचनाविशेषः संस्कृतजगतः पुरस्तान्निधीयते।

अस्यां रचनायां विदुषा लेखकेन विदुष एव चरितमुपश्लोकितम्। पण्डितराजजगन्नाथपरिपन्थिरूपेण ज्ञातस्य श्रीमदप्पय्यदीक्षितस्य किञ्चिन्नवीनमेव रूपमत्र विलसति।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चरितनायकस्य 'अप्पर'—'अप्पय्य'—'अप्पय' इत्यभिधानत्रये 'अप्पय' इत्येव लेखकेन प्रयुक्तम्। तस्य द्वाविंशतिशीर्षकेषु चरितं तेन निबद्धम्। श्रीमदप्पय्यदीक्षितस्य जीवनविषये प्रचलितानां किंवदन्तीनामपि लेखकेनोपयोगः कृतः। स्वाध्यायपरः, सद्गृहस्थः, कर्मकाण्डप्रकाण्डः, लोकसम्मानितः, समन्वयकर्ता, शरणागतवत्सलः, शिष्यवत्सलः, दार्शनिकः, दानशीलः, विलक्षणचमत्कारो, भक्तः, तीर्थस्थानावलोकनशीलः प्रसिद्धग्रन्थकर्ता च चरितनायकः आदर्शगुणानां संघातरूपेणात्र लेखकेनोपवर्णितः। तस्य कर्मकाण्डपरताप्रकरणनवतम्ब्य विदुषां विसंवादा सम्भवितुमर्हन्ति किन्त्वत्र तद्विषयकंकिंवदन्ती एव कारणम्। 'ग्रन्थकर्ता पशुबलिं समर्थयतो'ति विद्वद्भिर्न निश्चेतव्यं स्यात्। पुनश्चात्र विषये समालोचका एव प्रमाणं न तु प्रकाशकः। इयं रचना २०३७ तमे वैक्रमाब्दे गुरुपूर्णिमायां सम्पूर्णा जाता। रचनायाः प्रेरणादिविषये 'पूर्वभूमि' रूपेण लेखकः स्वयमेव स्वविचारान्प्रकटीकरोति—अतस्तत्र न कश्चिदुत्प्रेक्षाविशेषः करणीयः। 'दीक्षितोपाह्वेन लेखकेन दीक्षितोपाह्वस्यैव नायकस्य चरितं कथमुपवर्णितम्?'—इति प्रश्नस्य लेखकोऽन्याभिर्नवनवाभी रचनाभिरुत्तरं दास्यतीति आशास्यते।

अन्ते चाहं देववाणीपरिषत्पक्षाद् ग्रन्थकर्तारमभिनन्दयामि येन स्वकृतेः प्रकाशनमतोऽनुमतम्।

विदुषामाश्रवः

वसन्तपञ्चमी, वि० सं० २०३७ — रमाकान्तशुक्लः
९ फरवरी १९८१ — महासचिवः, देववाणी-परिषद्, दिल्ली
सोमवासरः — ६, वाणी-विहारः, नयी दिल्ली-११००५९

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पूर्वभूमिः

अरातौ मित्रता यस्य समा दृष्टिर्हरौ हरे ।
आजीवनं समातिष्ठत् तं वन्देऽप्पयदीक्षितम् ॥

विदन्त्येव विद्वांसो यत् संस्कृतवाङ्मये श्रीमद्-अप्पय-दीक्षितस्य महनीयं स्थानमस्ति । अत्रत्या दार्शनिकाः, भक्ताः, साहित्यिका वा तदीयेन अतिमहत्त्वपूर्णेन तत्तत्क्षेत्रीयेण योग-दानेन भृशमाप्यायिताः प्रभाविताश्च संजाताः सन्तीति न केषामपि तत्तच्छास्त्रजुषां विदुषां परोक्षम् । सिद्धान्तलेशसंग्रह-मध्वतन्त्रमुखमर्दन-नयमयूखमालिकादिषु तदीयेषु ग्रन्थेषु यदि दार्शनिकचिन्तनगाम्भीर्य्यमालोक्यते, तर्हि आनन्दलहरीशिख-रिणीमाला–अरुणाचलेश्वरस्तुति–शिवकर्णामृतादिषु भक्ति–ग्रन्थेषु तदीयो निर्भरो भक्तिभावोऽपि समनुभूयते । एवमेव चित्रमीमांसा-कुवलयानन्दादिष्वपि अलङ्कारशास्त्रीयेषु ग्रन्थेषु तदीया अलङ्कारसमीक्षासरणिरपि पाठकानां चेतांसि भृशं चमत्करोतीत्यत्र तद्विदामैकमत्यम् । किन्तु एवंविधविविध-वैदुष्यविभाविभूषितस्यापि श्रीमदप्पयदीक्षितस्य समग्रं जीवन-चरितमुद्दिश्य लेखकानां लेखनी सोत्साहं नोदतिष्ठदित्यनुभूय मामकीनं मनो विस्मयं समवाप्नोत् । इतस्ततश्च तद्विषये पाठं पाठं श्रावं श्रावं च मम मनसि समीहा समभूत् यद् एतस्य विद्वद्वरस्य कथात्मकं जीवनचरितं मया अवश्यमेव लिखे-लिमम् । कालान्तरे सा समीहा कार्यान्विता कर्त्तुमारब्धा । यद्यपि अस्मिन् कार्ये अनेकधा क्रियावरोधोऽभूत्, किन्तु ईश्वरा-

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नुकम्पया मामको सा समीहा गुरुपूर्णिमायां २०३७ तमे वक्रनाब्दे मूर्त्तिमतो जातेति विलोक्य अमन्दमानन्दसन्दोहमहमनुभवामि ।

इयं रचना कीदृशी ? अत्र कीदृशः कथावस्तुप्रवाहः ? कीदृशी अत्र भाषा ? कीदृशी अत्र शैली ? कश्चात्र सन्देशः ? इत्यादिकन्तु सर्वं सदसद्व्यक्तिविधायकानां बुधानामेव चिन्तनम्, न मे विलसति प्रभवति वा तत्र दुर्बला धिषणा । अहन्तु केवलमेतावदेव जाने यदिदं गद्यकथात्मकं चरितपुस्तकं समधीत्य यदि मनीषिणां मनागपि मनस्तोषो भविष्यति, तर्हि मामकः श्रमः सफलः सम्पत्स्यते । अपरञ्चापि समाशासे यच्चरितनायकः शिवज्ञोनः शिवभूतो वा श्रीमदप्पयदीक्षितोऽपि स्वीयचरितकीर्तनं निशम्य प्रीतो भूत्वा मयि सस्नेहं शुभाशीराशिं वितरतु; येन ममापि जीवनं धन्यं स्यादिति साभिनिवेशं समभिलष्य विरमामि विस्तरादिति ।

—डॉ० हरिनारायणदीक्षितः,

* *

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीमदप्पयदीक्षित-चरितम्

अरातौ मित्रता यस्य समा दृष्टिर्हरौ हरे।
आजीवनं समातिष्ठत् तं वन्देऽप्पयदीक्षितम् ॥

पुरा दक्षिणे दक्षिणभारते द्रविडदेशे तुण्डीराख्ये जनपदे श्रीकाञ्चीसंज्ञिकायाः नगर्याः समीपे अडयप्पलनामनि ग्रामे भारद्वाजवंशावतंसः विदग्धाग्रणीः सकलशास्त्रपारदृश्वा साहित्यसुधासागराप्लावितचेताः सचेताः आचार्यदीक्षित-नामा वक्षःस्थल-गणपत्युपासनालीनमनाः धीधनः परमतपस्वी द्विजवरो निवसति स्म ।

तदीयगुणगणाकृष्टचेताः परमब्रह्मण्यः शरण्यः दान-परम्पराभिश्च ह्रेपितपारिजातो विजयनगराधीश्वरः कृष्ण-राजस्त विप्रर्षि सदैव पूजयामास; तदीयं शिरश्च तच्चरणा-रविन्दयोः सदैव भृङ्गायते स्म ।

तस्य सुमेधसः द्वे पत्न्यौ बभूवतुः; ययोर्ज्यायसी स्मार्ता कनीयसी च वैष्णवी आसीत् । ते द्वे अपि चतुरः चतुरः पुत्रान् जनयामासतुः । यद्यपि ते सर्वेऽपि अष्टौ भ्रातरः अलौकिकेन स्वीयेन शीलेन, विलक्षणया प्रतिभया, अव्याज-मनोहरेण सौन्दर्येण, अद्वितीयेन श्रुतेन अष्टाभिः दिक्पालै-रिव अष्टापि च दिशो निजदीप्त्या द्योतयितुमलम्बभूवुः; किन्तु कनीयस्यां धर्म्मपत्न्यां जातेषु जातकेषु न केवलेन वय-सैव, अपितु यशसा, तेजसा, मेधयापि च ज्येष्ठो रङ्गराजा-

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ध्वरिनामा बालकस्तु विशिष्ट एवासीत् ।

ततोऽपक्रान्ते कस्मिंश्चित्काले शाश्वतं धाम प्रपन्ने पितरि श्रीरङ्गराजाध्वरी धर्मधुरं वहन् सर्वेषां शङ्करं श्रीशङ्करं मनसा वाचा कर्म्मणा समाराधयन्, पूज्यान् पूजयन्, सदाचारशीलान् सम्मानयन्, कदाचारलीनान् सन्मार्गमानयन् तदानीन्तनैश्च चिन्नबोम्म कालहस्ति-वेङ्कटगिरिप्रभृतिभी राजभिः संपूज्यमानः द्विजजनोचितषट्कर्मसु परायणो भूत्वा मनोरमया धर्मपरायणया तेजस्विन्या कामिन्या धर्मपत्न्या सह ससुखं समोदं निवसन्नासीत् । यदा च चत्वारिंशद्वर्षदेशीयोऽपि स स्वसुतमुखकलावलोकनसुखमनुभवितुं न शशाक, तदा चिन्ताविताना च्छन्नमनाः आत्मानं पितृणान् मोचयितुकामो जायासहायः स्वीयं कुलदैवतं मार्गसहायेश्वरसंज्ञकं देवताविशेषं प्रीणयितुं विरिञ्चिपुरीं जगाम । तत्र श्रद्धाभक्तिविश्वासपुरस्सरमाराधितः अतएव च प्रीतिमापन्नो मार्गसहायेश्वरः आकाशवाणीं चकार यद् 'भो भक्तराज रङ्गराज ! श्रीचिदम्बराख्ये अधिष्ठाने विराजमानं श्रीनटराजमाराधय, तत्र त्वदीया पुत्रैषणा फलवती भविते'ति ।

श्रीरङ्गराजाध्वरी इमां गगनवाणीं निशम्य आशानन्दपयोनिधौ निमग्नो भवन् मार्गसहायेश्वरं भक्तिकृतज्ञताह्लादपुरस्सरं प्रणम्य ततः प्रस्थाय श्रीनटराजसमर्चनोत्सुकः सजायः स आश्वेव श्रीचिदम्बरं प्रति प्रतस्थे; तत्रत्ये च परमपावने विरोधिसत्त्वोज्झितस्वीयमत्सरे सुपाच्यपरिपक्वफलैः सुशोभिते तिल्लवने निवासमाकलय्य श्रीनटराजाराधनायां विगतान्यवृत्तिः स सुधीर्बभूव ।

यदा मनोवाक्कर्मभिरनारतं श्रीनटराजमाराधयतो जायासखस्य तस्य पञ्चषाणि वर्षाणि व्यतीयुस्तदैकदा तदीयभक्तिपूरप्रीतो भगवान् तत्रभवान् श्रीनटराजो नभोवाङ्माध्यमेन तं रङ्गराजाध्वरिणं जगाद—'भो द्विजेन्द्र ! अलं तपसा । अहं त्वयि परमप्रसन्नोऽस्मि; अचिरेणैव कालेन मामकेन अंशेन पूरितौ द्वौ सुतौ तथा एका सुता तव भविष्यन्तीत्यत्र न

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संशयः' इति ।

सुधासंकाशां तामतिमोददायिनीं कामनापूरणीं नभोवाणीं श्रवणविषयीकृत्य श्रीरङ्गराजसुखसीमा एव नावशिष्यत । झटिति च श्रीनटराजमनुनीय गेहिनी-समेतो गृहाभिमुखं यावदेव चलितुकामो बभूव, तावदेव श्रीनटराजः स्वकीयपूजकरूपनेपथ्यमाकलय्य स्वाभिषेकपूतं मधुरफलरसमिश्रितं पयः सौवर्णचषके निधाय श्रीरङ्गराजाभिमुखमागत्य प्रोवाच—'भक्तशिरोमणे ! देवदुर्लभमिदं पयः स्वधर्मपत्नीं पायय; श्रीनटराजदयादृशा श्रुत्रमचिरेण सन्ततित्रयीं लप्स्यसे'—इत्येवमुक्त्वा सश्रद्धं ग्रहीतुकामाय च श्रीरङ्गराजाय तत्पयश्चषकं दत्वा तस्मिन् पश्यत्येव अन्तरधात् । श्रीरङ्गराजोऽपि इमां संघटनां दैवीं मन्यमानो हृदये हर्षातिरेकमनुभवन् तद् दिव्यं पयः स्वधर्मपत्नीमपाययत् । सापि गरीयस्या श्रद्धया, द्रढीयसा विश्वासेन च तमेव श्रीनटराजमनुध्यायन्ती पपौ । तदनन्तरं श्रीनटराजं भूयोभूयः प्रणम्य हृष्टविश्वस्तमानसौ तौ स्वगेहं प्रति प्रातिष्ठाताम् ।

श्रीदीक्षितस्य जन्म

तत्पयःपानप्रभावेण श्रीरङ्गराजजायायां किमपि वाचामगोचरं विलक्षणं तेजो ददृशे । तथा समक्षं तेजस्विनीं तामालोक्य मुमुदे श्रीरङ्गराजः । प्रजाप्रीत्याऽखिलदोहदैर्वैर्निरन्तरं प्रीनिमतीं चकार । सोऽनुक्षणं गर्भभरालसां निम्ननाभिचक्रां पाण्डुरवदनाम् उन्नतनितम्बविम्बां पीनश्रोणिपयोधरां मन्दगमनां गर्भज्योतिष्मतीं स्वपत्नीं निभालं निभालं श्रीनटराजचरणारविन्दयुगलं कृतज्ञतापूर्वकं ध्यायं ध्यायं च सुतमुखकमलावलोकनप्रतीक्षापरो बभूव । तेषु वासरेषु श्रीरङ्गराजपत्नी रत्नगर्भ मौक्तेयघटी इव चकाशे ।

एवं गच्छति काले परिपूर्णे च गर्भपुष्टिकाले ईशवीये षोडशे शतके सकलगुणगणवरिष्ठे महिष्ठे मुहूर्त्ते श्रीरङ्गराजाध्वरिधर्मपत्नीवामकुक्षिसागरात् एकम् अतिरमणीयं सर्वजन-

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

लोचनानन्ददायकं भासुरं विलक्षणकान्तिसम्पन्नं पुत्ररत्नं जज्ञे। जातकेऽस्मिन् जाते सत्येव जगद् वीतापद् संजातम्। सज्जनास्तु सन्तोषमेव, किन्तु दुर्जनास्तु अपूर्वमेव सन्तोषं लेभिरे। षडङ्गा वेदाः स्वीयां स्थितिं दृढीयसीं मेनिरे। सर्वे एव श्रीरङ्गराजाध्वरिणः सखायो बालकजन्ममहोत्सवं महता सम्भारेण चक्रिरे। बालोऽपि मातृगर्भाद् विनिस्सृतः तत्परिचयाधिक्यात् पुनरपि मनःसु एव मनीषिणां प्रविशन् इव दिदीपे। श्रीरङ्गराजाध्वरिणश्चिरकालसञ्चितो मनोरथस्तदानीं पूर्त्ति जगाम। सुतमुखकमलं घ्रायं घ्रायं मनोमिलिन्दो मुमुदे तदीयः। बालके विलक्षणं तेजोमण्डलं दर्शं दर्शं तस्मिन् तदीया श्रीनटराजांशबुद्धिर्बभूव।

श्रीदीक्षितस्य नाम

अद्यत्वे वयं सर्वे श्रीदीक्षितस्य नामधेयम् 'अप्पयदीक्षितः' इत्येव जानीमः। किन्तु तदीयं वास्तविकं श्रीपितृचरणकृतं समन्त्रकं नाम तु 'विनायकसुब्रह्मण्यः' इत्येवासीत्। यथा साम्प्रतं दृश्यते लोके यद् मातापितृभातृस्वसृप्रभृतयो ज्यायांसो जनाः वात्सल्यातिरेकेण शिशुं 'पप्पू' पप्पी' 'मुन्ना' 'मुन्नी' 'बबलू' 'बबली' इत्यादिभिः अर्थवद्भिरनर्थवद्भिर्वा नामभिरेव आह्वातुमारभन्ते तथैव पुरापि श्रीरङ्गराजाध्वरी स्नेहातिशयेन एनं श्रीदीक्षितमहोदयन् 'अप्प' इति नाम्ना एव आह्वातुमारेभे। अन्येऽपि तदीयाः प्रेमिणः एनेनैव नाम्ना एनं शैशवे आह्वातुमभ्यस्ताः बभूवुः।

यद्यपि शैशवे अस्य महोदयस्य 'अप्प' इति नाम निरर्थकमेव आसीत्, किन्तु अग्रे चलित्वा जीवने अयम् एकादश्यादिषु व्रतदिनेषु केवलाः अपः एव पीत्वा अस्य नाम्नश्चारितार्थ्यमपि चकार। यदा च अप्पशब्दो व्युत्पत्तिमागतस्तदा तु एतस्य इदमेव नामधेयं लोकेषु ख्यातिमाजगाम।

न केवलम् 'अप्प' इत्येव तदीयं नाम प्रचलितम्, अपितु एतन्माम्ना सहैव ईषद् विकारमापन्नौ अप्पय-अप्पय्यशब्दावपि

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एतदीयसंज्ञात्वं लेभाते। इमे अप्प-अप्पय-अप्पय्येति त्रयोऽपि स्नेहोक्ताः शब्दा एतदीयनामगौरवं प्रापुः।

यद्यपि अप्पय-अप्पय्यशब्दापेक्षया अप्पशब्द एव शुद्धोऽस्ति, तथा श्रीदीक्षितमहोदयेनापि आत्मनः कृते अस्य नाम्नः प्रयोगो विहितोऽस्ति, तथापि तदीयम्, अप्पदीक्षित' इति नाम 'विनायकसुब्रह्मण्य' इति तदीयमपरनाम इव लोकेऽनुच्यमानमेव लभ्यते। लोके तु 'अप्पयदीक्षितः' 'अप्पय्यदीक्षित' श्चेति उभे एव नामनी आधिक्येन प्रचारमापतुः।

किन्तु साम्प्रतं तु वयं सर्वे 'अप्पयदीक्षित' इति नाम्ना एव तं स्मरामः; यदा कदा च 'अप्पय्यदीक्षित' इति नाम्नापि स्मरामः; किन्तु साम्प्रतिकेषु जनेषु न कोऽपि तम् 'अप्पदीक्षित' इति नाम्ना 'विनायकसुब्रह्मण्य' इति नाम्ना वा स्मरति।

अयं श्रीमदप्पयदीक्षितः शैशवे स्वीयविलक्षणया मुखमण्डलाभया, परिस्फुरन्त्या च देहकान्त्या, शिवनिष्टया क्रीडया स्वीयमातापितरौ भृशं प्रीणयामास। कदाचिद् अनिमित्तैः कदाचिद् सनिमित्तैः मन्दस्मितैः मञ्जुहासैर्वा आलक्ष्यदन्तमुकुलम्, अव्यक्तवर्णरमणीयवचःप्रवृत्तिम्, अङ्काश्रयप्रणयवन्तम् अमुम् अतिरमणीयम्, ईषत्कुञ्चितकेशं मनोहरवेशं विशालभालं बालं निभालं निभालं तल्लालनपालनपरायणः सपत्नीकः श्रीरङ्गराजाध्वरी आत्मानं धन्यं मन्यमानो ब्रह्मानन्दसागरे इव पुत्रानन्दपयोनिधौ निमग्नो जागतिककार्यान्तरं नक्तन्दिवभावञ्च विसस्मार।

श्रीदीक्षितस्य अनुजोऽनुजा च

एवमपक्रामत्सु कतिषुचिद् वासरेषु श्रीनटराजाशीर्वादानुसारेण एव श्रीरङ्गराजाध्वरी एकं द्वितीयं पुत्रं तथा एकां कान्तकलेवरां पुत्रीं लेभे। द्वितीयपुत्रस्य नामधेयम् 'आचार्य दीक्षितः' इति आसीत्। किन्तु अशिक्षिता भूयांसो जनाः आचार्यशब्दोच्चारणासामर्थ्यात् आच्चानदीक्षितनाम्ना एव तं सम्बोधयामासुः। तदीयपत्न्याः नामधेयं तु तदीयदेहेन सहैव

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कालेन कवलीकृतमस्तीति खेदविषयः। एवं हि श्रूयते दाक्षिणात्येषु यद् तस्या विवाहः वाधूलगोत्रोद्भवेन कुलीनेन शास्त्रप्रवीणेन द्विजकुमारेण सहाभूत्।

श्रीदीक्षितस्य शिक्षादीक्षे

श्रीमदप्पयदीक्षितमहोदयस्य प्रारम्भिकी शिक्षा तदीयपितृचरणच्छायायामेव अभूत्। एतदीयेन पित्रा श्रीरङ्गराजाध्वरिणा एव अस्मै मातृकाक्षराणि पाठितान्यासन्। यदा अयं वर्णपरिचये शब्दपरिचये तदर्थज्ञाने च कुशलो बभूव तदा श्रीरङ्गराजाध्वरी अमुं स्वपुत्रं समीपवर्तिनि मुल्लङ्गनामनि ग्रामे निवासिनो मनीषिणो विद्वत्कविकुलकमलरवेः श्रीगुरुरामकवेश्वरणयोः पाठनाय समर्पयामास।

श्रीगुरुरामकविना महता स्नेहेन, भूयसा वात्सल्येन अयं पाठितः। गुरुशिष्ययोः परमा प्रीतिरासीत्। गुरुः इमं विना, अयं च गुरुं विना खिन्नो भवति स्म। श्रीगुरुरामकवेः पाठनशली अतीव छात्रप्रिया आसीत्। स अतिसरलतया एव गभीरतममपि ग्रन्थाशयं बोधयितुं पटीयानासीत्।

इतश्च श्रीमदप्पयदीक्षितस्य तु कथा एव विलक्षणा आसीत्। 'अनुक्तमप्यूहति पण्डितो जनः' इतीयमुक्तिः अस्मिन् अक्षरशश्चरितार्था भवति स्म। मेधाविनाम् अन्तेवासिनां वरोऽयं दीक्षितमहोदयो गुरुमुखारविन्दात् स्रवत्काव्यकौशलसारसर्वस्वं ग्रन्थाशयं झटित्येव आत्मसादकार्षीत्। परिणामोऽयमभूत्, यद् एतस्य धारणाशक्ति ग्राहिकाशक्ति तथा अनुपमां गुरुभक्ति दर्शं दर्शं परमप्रीतमनाः श्रीगुरुरामकविः निखिलशास्त्रग्रन्थग्रन्थिभेदनपुरस्सरमेनं पुत्रीयन् अल्पीयसा एव अनेहसा समस्तमेव भूसुरोचितं भासुरम् अनश्वरं विसृत्वरं सारस्वतं वैभवं प्रहीणदोषाय जितेन्द्रियाय अस्मै हृद्गताशीराशिसमन्वितं समोदं प्रददौ।

गुरुकृपापीयूषपाकोद्भवं सारस्वतं वैभवं समुपलभ्य श्रीदीक्षितः काव्यालङ्कारमर्मनैपुणीं समुपेयिवान् तथा काव्य-

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

काननपञ्चाननत्वं साहित्य-सुधाऽऽस्वादपटीयस्त्वं च लेभे। सहैव काव्यकलामाधुर्य्येण सः सकलदेशभाषाव्यवहारप्रावीण्यं शास्त्रार्थमल्लशालाधुरीणत्वञ्चापि समवाप। श्रीगुरुरामकविस्तु सागरोच्छलद्वीचीप्रचारैरिव एतदीयैः अकाट्यवाचां प्रचारैः, वादिमुखमुद्रणामोघैः अभेद्यैस्तर्ककूटैः स्वीयहृदयाभ्यन्तरे अमान्तममन्दमानन्दसन्दोहमनुभवन् तादृशशिष्यलाभेन जगतो निखिलमपि लक्ष्मीवैभवं तृणाय मन्यमान असीत्।

एवंरीत्या यदा श्रीमदप्पयदीक्षितः श्रीगुरुरामकविकृपा-पारावारोपलब्धज्ञानरत्नराशिकमनीयकान्तिकान्तकलेवरः तथा ज्ञानमदमत्तविपक्षीविपश्चिन्मातङ्गोत्तुङ्गभालविदलनपटुकेसरि किशोरो बभूव तदा हर्षगौरवातिशयात् तस्य पिता श्रीरङ्ग-राजाध्वरी महता आदरेण महत्या च श्रद्धया श्रीगुरुरामकविं यथाशक्ति प्रदत्तया सुलक्षणया दक्षिणया सम्पूज्य पाठनकलाकोविदं तं मुहुर्मुहुः प्रशशंस।

तदनन्तरं श्रीरङ्गराजाध्वरी मौहूर्त्तिकैरुपदिष्टे एकस्मिन् शुभे मुहूर्त्ते ज्येष्ठात्मजं श्रीदीक्षितं श्रौतेन विधिना उपनीय शिक्षा-व्याकरण-कल्प-निरुक्त-ज्यौतिष-छन्दोयुतां त्रयीं पाठयितुमारेभे। श्रीदीक्षितमहोदयेन श्रीगुरुचरणसकाशादिव श्रीपितृचरणसकाशादेव समस्तं वैदिकवाङ्मयवैभवं समस्तञ्चौपनिषदं तत्त्वं, निखिलजातं च स्मार्तर्थमजातं महता प्रौढिम्ना गरिम्णा च साकमलम्भि। श्रीदीक्षितस्य मनोभूमौ स्वीयपितृ-चरणकमलयोः कृते परमोत्कृष्टा गुरुभावना आसीत्। पितृत्वञ्च उभयं मिलित्वा कमपि विलक्षणमेव श्रद्धातिशयमुत्पादयामास तच्चित्ते। वस्तुतस्तु श्रीदीक्षितमहोदयेन श्रीरङ्गराजाध्वरिणि पितृत्वापेक्षया गुरुत्वमेव आधिक्येन प्रेक्षितम्। एतत्सौभाग्यं जगति विरला एव जना लभन्ते। यस्य पिता एव शास्त्रोपदेष्टा गुरुर्भवति; वस्तुतः स लोके धन्यो भवति। तयोः पित्रापुत्रयोः सम्बन्धः गुरुशिष्यसम्बन्धसम्पर्कमासाद्य अतीव भव्यो हृद्यानवद्यो वा बोभवीति। अस्मदीयदीक्षितमहोदयः अतीव सौभाग्यशाली आसीत्। तेन सगौरवं स्वीयग्रन्थेषु स्वीयपितृचरणयोः एव

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्वीयनिर्भ्रान्तगुरुत्वभाव: प्रकटीकृतोऽस्ति । यद्यपि एतादृशेषु सर्वेषु एव स्थलेषु पितृत्वोपरि गुरुत्वस्य विजयो दरीदृश्यते, तथापि उभयविधभावनाया: मञ्जुलं समन्वयं कृत्वा श्रीदीक्षित-महोदयेन आदर्शपुत्रादर्शशिष्ययो: उत्कृष्टतमा भाजनताधि-गतास्तीति ।

स्वकीयपितृचरणश्रीरङ्गराजाध्वरिसकाशात् समस्त-शास्त्रार्थविचारपाटवं, गभीरतमस्यापि विषयस्य सरलीकरण-कलाकौशलम्, अविनीतस्यापि विपक्षविपश्चित: तन्मतनिरसन-पूर्वकविनीतीकरणप्रावीण्यं च साधु समासाद्य पञ्चदशवर्षदेशीय एव श्रीदीक्षितमहोदय: स्वीयवैदुषीयशोमाध्यमेन सर्वत्रैव प्रथितनामा अभीष्टदर्शनश्च बभूव ।

श्रीरङ्गराजाध्वरी अपि श्रावं श्रावं स्वपुत्रप्रकाण्डपाण्डित्यं दर्शं दर्शञ्च तद्यशश्चारुचन्द्रिकावितानं मोक्षाभिलाषमपि तत्याज । शिष्यीभूतपुत्रोत्कर्षे एव आत्मोत्कर्षं मन्यमान: स परां प्रीतिं जगाम ।

पितृ-विरह:

सुपुत्रस्य श्रीरङ्गराजाध्वरिणो वैदुष्ययशोगुणान् श्रावं श्रावम् आकृष्टचेता: सचेता: वेल्लूरपुराधीश: श्रीचिन्नबोम्म: स्वीयसभायां सादरं तमानिनाय । बहूनि दिनानि तेन सत्क्रिय-माण: सपुत्रो रङ्गराजाध्वरी तत्र निवासं चकार । एकदा स्वकीयमन्तकालमालक्ष्य श्रीरङ्गराजो भूपतिमापृच्छ्य सपरिवार: पुन: स्वीयम् अडयप्पलं ग्राममागत: । अत्रागतवतोऽस्य अनेकानि दिनानि न भूतानि आसन्, यदेकस्मिन् दिने स्वकीयौ उभावपि (अप्पय-आच्चानदीक्षितौ) पुत्रौ आहूय निर्मलस्य विनम्रस्य च जीवनस्य पाठं साधु पाठयित्वा भगवन्तं श्रीजगदीश्वरं शङ्करं संस्मरन् नश्वरं स्वीयं पाञ्चभौतिकं देहं परित्यज्य परब्रह्मणि लीनो बभूव ।

तत्क्षणं श्रीमदप्पयदीक्षिते असामयिक इव, अज्ञात इव, अतर्कित इव अशनिपातो भूतवान् आसीत् । सुशिक्षितोऽपि

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अप्पयदीक्षितः प्रेष्ठगुरुत्ववत्पितृविरहानलज्वालाजालावलिह्यमानावयवो भवन्नासीत्। धैर्यधारिधौरेयोऽपि सः सहजामपि स्वीयां धीरतामपहाय ईषत्कालाय किंकर्त्तव्यविमूढो बभूव। यतो हि तदीयः कृपावत्सलः केवलः पिता एव नहि, अपितु दया सागरः करुणावरुणालयो निर्भ्रान्तिशास्त्रोपदेष्टा भवाटवीपारनेता विनेता गुरुरपि प्रणष्टो भूतवानासीत्। अत एव तस्य दुःखसिन्धुर्द्विगुणितो बभूव।

ततोऽपक्रामत्सु कतिपुचिद् क्षीणक्षणेषु खेदक्षणेषु प्राप्तज्ञानराशिप्रकाशपुञ्जैः कथङ्कथमपि न्युब्जीकृते शोकनिबिडतिमिरे सानुजः श्रीमदप्पयदीक्षितः गुरुत्वपूर्णपितृचरणानां सर्वा एव और्ध्वदैहिकीः क्रियाः यथाविधि सम्पादयामास।

श्रीरङ्गराजाध्वरिनिर्वाणं निशम्य सर्वत्रैव दुःखलहर्यो व्यापुः। सर्वे विद्वांसः तदीयेनात्यन्तिकेन विरहेण दुःखिता बभूवुः। श्रीचिन्नवोम्मभूपालप्रभृतयो राजानोऽपि दुःखसागरे निममज्जुः। श्रीरङ्गराजाध्वरिणः सदाचारशीलता, नम्रता विद्वत्ता च समेषामेव हृदयानि हृतवत्य आसन्। अतस्तद्विरहः सर्वानेव रोदयामास।

कालो गच्छन्नासीत्। श्रीमदप्पयदीक्षितस्य चित्तपटले स्वकीयपितृपादगुरुपादश्रीरङ्गराजाध्वरिणः एव नानाभावमुद्रावत्यो मूर्त्तयो रचिताः विनष्टाश्च भवन्त्य आसन्। संसारे स आत्मानमेकाकिनमेव मन्तुमारब्धवानासीत्। पुस्तकस्य पृष्ठेषु वाक्येषु शब्देषु अक्षरेषु तेन तदीया एव छविः दृश्यमानासीत्। क्षणमात्रमपि सा मूर्त्तिः तन्नयनाभ्यां नापसरति स्म। प्रायेण तदीये चक्षुषी शुष्के एव अभवताम्, किन्तु भावविभोरतया कदाचित् ताभ्यामेव शास्त्रपारदृश्वभ्यां नेत्राभ्यामविरला अश्रुधारापि वोढुमारभत। तदीयां तामभूतपूर्वां दशां दर्शं दर्शं तदनुजः आच्चानदीक्षितः इतरे च प्रतिवेशनिवासिनोऽपि दूना अभूवन्।

परन्तु अयं प्रेष्ठगुरुपितृविरहः तदीये जीवने अनुपमं परिपाकम् अद्वितीयञ्च जगद्दर्शनमप्यानीतवान्। अथ तस्य

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शोकसागरस्य नामापि नावशिष्टमासीत्। अपि तु तत्स्थाने आसीदेका दृढीयसी गवेषणापूर्णा च तत्त्वनिष्ठा निर्भया भवानुभूतिः। तदीये पाण्डित्ये वैदुष्ये च विलक्षणं तेजो दृश्यमानं बभूव। जगतो या अनित्यता प्राक् शास्त्रेष्वेव लब्धासीत्, तामक्षिलक्ष्योविधाय तदीयं ज्ञानमनुभूतिपरायणं बभूव। अत एव तदीयवाक्षु द्रढिम्ना पदमदीयत।

वेलूरपुराधीशः श्रीचिन्नबोम्मो रङ्गराजाध्वरिशून्यां स्वीयां सभां दृष्ट्वा तत्स्थाने तदीयं भव्यं पुत्रं श्रीमदप्पयदीक्षितं पूजापुरस्सरमभिषिषेच। श्रीदीक्षितेन स्वीयनम्रेण वैदुष्येण सकला एव सभ्याः वशीकृताः। राजापि तदीयेन वाग्वैभवेन अतितरां प्रभावितो बभूव। किन्तु तस्यां सभायां ताताचार्यनामा एको विदग्धो राज्ञः कृपाभाजनत्वात् प्रधानामात्यपदासीनोऽत एव नितरां मदमत्त आसीत्। तस्य श्रीदीक्षितपितृचरणैः श्रीरङ्गराजाध्वरिभिः सह प्रवृद्धं वैरमासीत्। सः स्वभावेन वैष्णव आसीत्; किन्तु शिवाय भृशमद्रुह्यत्। श्रीदीक्षिताः तदीयपितरः श्रीरङ्गराजाध्वरिणश्च परममाहेश्वरा सन्तोऽपि श्रीविष्णुं कदाचिदपि नाभिद्रुह्यन्ति स्म। संसारं त्यक्तवत्सु श्रीरङ्गराजाध्वरिषु स ताताचार्यः श्रीदीक्षितं स्वप्रतिद्वन्द्विनं मन्यमानोऽस्मै भृशमीर्ष्यति स्म।

एकदा तेन ताताचार्येण श्रीदीक्षितमतनिरासाय शैवमतखण्डने स्वीयं समस्तं वाचां बलं प्रकटीकृतम्। किन्तु विनीता अपि श्रीदीक्षितमहोदयाः श्रीशिवावहेलामूलकं तदीयमिदमौद्धत्यं सोढुमशक्नुवन्तः स्वीयैरकाट्यैस्तर्कैः, दुर्धर्षैः सिद्धान्तपक्षैः, उद्दामैः नदीवेगोपमैश्च प्रमाणप्रवाहैः शैवदर्शनस्य लोकमङ्गलमूलकतां साटोप साधयामासुः। श्रीदीक्षितमहोदयानां धाराप्रवाहैः प्रवचनैः समस्तापि सभा चमत्कृता सती अभीक्ष्णं साधुवादान् कथयितुमारेभे। निरस्तवैदुष्यस्त्रपाभिभूतश्च ताताचार्यः पूर्वतोऽपि द्विगुणतरं वैरं श्रीदीक्षितेषु बबन्ध।

इतरे राजानस्तदीयं तं तथाविधं वाणीविलासं श्रावं

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्चात्रं श्रीदीक्षितान् आहूय पूजयितुमारेभिरे। साम्प्रतं तदीयं यशो दिक्षु विदिक्षु प्रसरद् आसीत्। महीयसा यशसा समं तदीया वपुष्कान्तिरपि क्षणे क्षणे हृद्यतामनवद्यताञ्च समुपेयुषी कामपि वाचाममगोचरां नयनमहोत्सवीभूतां रमणीरमणीयामद्वितीयामभिख्यां लभमानासीत्।

श्रीदीक्षितस्य गार्हस्थ्ये प्रवेशः

श्रीमदप्पयदीक्षितस्य विवाहः तुण्डीराख्ये एव जनपदे शरसमुद्रनामकग्रामनिवासिनोऽग्निहोत्रिणो द्विजवंशावतंसस्य रत्नखेटोपाधिधरस्य श्रीयुतस्य श्रीनिवासदीक्षितस्य एकया सुशीलया विनयवत्या विद्यावत्या रूपवत्या कन्यया समं बभूव; यस्याः पितृकृतं नाम 'मङ्गला' 'मङ्गलाम्बा' वा आसीत्। किन्तु व्यवहारे जनाः तस्याः नाम 'आच्चालुः' इत्येव गृह्णन्ति स्म। श्रीदीक्षितमहोदयोऽपि तस्या अनेन नाम्ना अपरिचित आसीत्। तेन तदीयमिदं नाम तदा ज्ञातं यदा स एकदा श्वशुरालयं जगाम; तत्रत्याश्च केचन जना इमं दृष्ट्वा शनैः शनैः अन्योऽन्यं कथयितुमारभन्त 'यदयमेव विलक्षणो विचक्षणः आच्चालोः पतिरस्ति' इति। तेषां वाचो निशम्य अयं ज्ञातुं प्राभवत् यद् तस्य धर्मपत्न्या एकं ग्राम्यं नाम 'आच्चालु' इत्यप्यस्ति। केचन तस्या नाम 'तोताराम्बा' इति मन्यन्ते; तां च काञ्चीपुरवासिनीं स्वीकुर्वन्ति।

विद्याभिमानान्वितस्य लब्धराजाश्रयस्य विपश्चितामपश्चिमस्य श्रीकामाक्षीकृपाकटाक्षभाजनस्य श्रीश्रीनिवासदीक्षितस्य तादृशसुयोग्यया भव्यया हृद्यया अनवद्यया सुविद्यया बालिकया सहास्य विवाहे दैवी प्रेरणा एव कार्यमकार्षीत्। यतो हि तदीयविवाहसंघटना महती विलक्षणा विस्मयावहा चास्ति; सा चेत्थमनुश्रूयते—वयसा वृद्धोऽपि विद्याभ्यासशास्त्रार्थमल्लशालासम्पुष्टः श्रीश्रीनिवासध्वरिनामा प्रकाण्डपण्डित. आर्यावर्त-पूनाराष्ट्राधिपतेः विद्वत्प्रियस्य श्रीचन्द्रशेखरभूमिपालस्य सभामगिरासीत्। स पण्डितः कामाक्षीदेव्याः

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रेष्ठभक्त आसीत्। देवी तस्मिन् प्रसन्ना भूत्वा तदीयान् साध्यानसाध्यानशेषानप्यभिलाषान् साधयति स्म। तया शास्त्रार्थे मानवविजयाय वरोऽप्यस्मै दत्त आसीत्। अत: श्रीश्रीनिवासाध्वरी सर्वानप्युद्भटान् पण्डितभटान् शास्त्रार्थसमरभूमौ तृणायापि न मन्यते स्म।

इतश्च श्रीमदप्पयदीक्षितस्यापि वैदुष्ययशोवैजयन्ती सर्वेषामेव विदुषां श्रवणाकाशभूमौ दोधूयमानासीत्। बाल्ये लोचनातिथीभूतस्य भव्यस्यास्य तरुणिमानं लभमानस्य श्रीमदप्पयदीक्षितस्य विसृत्वरं वैदुष्ययशः श्रावं श्रावं श्रीश्रीनिवासाध्वरिणा तेन समं शास्त्रार्थसमरं विधातुं मनश्चक्रे।

एकदा श्रीचन्द्रशेखरभूपालेन श्रीमदप्पयदीक्षितस्य पाण्डित्यचर्चा चालिता; तदैव श्रीनिवासाध्वरी शास्त्रार्थे श्रीदीक्षितं विनेतुं भूपानुमतो भूत्वा काञ्चीपुरीमागत्य तत्र कृतावासां श्रीकामाक्षीं प्रसादयितुमनुष्ठानं कर्तुमारेभे। तेन प्रीता देवी प्रत्यक्षमाह श्रीनिवासाध्वरिणं यद् 'भो वत्स! वरो व्रियताम्; त्वयि भृशं प्रीतमती अस्मि' इति। श्रीश्रीनिवासेन साह्लादं सत्वरञ्च समुदीयमानस्य विपश्चितां वरेण्यस्य जिज्ञासुजनशरण्यस्य श्रीमदप्पयदीक्षितस्योपरि शास्त्रार्थसमराङ्गणे विजयप्राप्तिः याचिता।

याच्ञामिमां निशम्य वात्सल्यपयोधितरङ्गायिताक्षी श्रीकामाक्षी श्रीनिवासाध्वरिणं परिबोधयन्ती प्राह—'वत्स! अलमनेन मनोरथेन। यतो हि श्रीमदप्पयदीक्षितो मनुजरूपः साक्षात् श्रीशि एवव वरीवृत्यते। तस्मात् तेन सह नास्ति श्रेयांस्तव शास्त्रार्थसमरः। यथा त्वं मम कृते; तथैव स श्रीशिवस्य कृते। यस्माद् युवां तुल्यमानभाजौ स्थः तस्मात् युवयोः शास्त्रसमरो न शोभाधायकोऽस्ति। अहं तु इदमपि अनुजाने त्वाम् यत्त्वं स्वीयां सुलक्षणां मङ्गलाम्बिकां कन्यकां सर्वगुणसम्पन्नाय एतस्मै श्रीमदप्पयदीक्षिताय एव तदीयभार्यात्वेन देहि। अयं संयोगः 'रत्नं समागच्छतु काञ्चनेन' इति कालिदासीयामुक्तिं चरितार्थयिष्यतीति मे मतिः। श्रीदेव्यास्तत्तादृशं प्रेमनिर्भरं

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वचो निशम्य प्रीतमनाः श्रीनिवासाध्वरी 'यथाऽऽज्ञापयति माता' इति शिरोविनमनपुरस्सरमुक्त्वा देव्यादेशं स्वीचकार। देवी श्रीकामाक्षी अपि विविधं तं परितोष्य अन्तरधात्।

इतश्चैकदा स्वप्ने कामाक्षीजानिना श्रीमदेकाम्रनाथेन श्रीदीक्षितः प्रबोधितो यद् 'गच्छ काञ्चीपुरीम्; तत्र विपश्चिदपश्चिमः श्रीरत्नखेटाध्वरी त्वया सह स्वीयसर्वगुणसम्पन्नायाः कन्यायाः विवाहं विधास्यति' इति। श्रीमदप्पयदीक्षितस्तु अमुं स्वप्नं भगवदादेशं मत्वा तत्प्रेरितान्तःकरणः सोपकरणः सशिष्यगणः काञ्चीं गत्वा कस्मिंश्चित्स्थाने निवस्तुमारेभे।

यदा श्रीश्रीनिवासाध्वरिणा इदं ज्ञातं यद् श्रीमदप्पयदीक्षितोऽपि शिष्यैः समेतः काञ्चीमेव अधिवसन्नस्ति, तदा तु स एकस्मिन्नहनि श्रीकामाक्षीनिदेशं मनसि निधाय जामातृत्वेन तं वरीतुकामस्तत्र तदीयावासे समाजगाम। श्रीमदप्पयदीक्षितेन तदीयं हार्दिकं स्वागतं प्रीतिपुरस्सरमकारि। लब्धसपर्यः श्री श्रीनिवासः श्रीमदप्पयदीक्षितवैदुषीं प्रशंसन् तस्मै स्वीयमङ्गलाख्यकन्यकादानरूपमभिलाषं प्रकटीचकार।

श्रीमदप्पयदीक्षितोऽपि साधुवादपुरस्सरं तदीयं वाचां वैभवं श्रीकामाक्षीकृपाकटाक्षभाजनतां च वर्णयन् कृतज्ञतापूर्वकं तदीयं प्रस्तावमङ्गीचकार; इदमपि च स्मयमानः स्पष्टीचकार यद् ममोपरि विजयावाप्तिकामनया भवद्भिः श्रीकामाक्षीपादपद्मवन्दना विहितास्ति; तत्र प्रत्यक्षीभूतया तया देव्या एव भवद्भ्यः इत्थमादेशो दत्तोऽस्ति येन महान्तोऽपि भवन्तः स्वीयपुत्र्याः मादृशेन सह विवाहं कर्त्तुमुद्यता जाताः सन्ति। परमस्तु नाम किमपि; अहन्त्वात्मानं धन्यं मन्ये; यस्य भवादृशाः हितैषिणः सम्बन्धिनश्च बुभूषन्तीत्येवं परस्परं हसन्तौ हासयन्तौ च श्रीमदप्पयदीक्षित—श्रीश्रीनिवासाध्वरिणौ उभावेव विवाहदिननिश्चयमपि चक्रतुः।

ततः समायाते तस्मिन् सर्वगुणोपेते शुभे दिने श्रीरत्नखेटाध्वरिणा श्रीश्रीनिवासेन स्वीयं निवासस्थानं तथा सज्जीकारितं यथा तद् इन्द्रगुरोः बृहस्पतेरपि मन्दिरमतिशयान-

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मासीत्। मुक्ता-मरकतमयीषु भित्तिषु स्थाने स्थाने खचिता माङ्गलिकसूक्तिरूपाः मणिप्रदीपा न केवलं तच्चारुतामेव, अपि तु 'यत्र द्वयं श्रीश्च सरस्वती च' इति वाचमप्यर्थवतीं कुर्वन्त आसन्। सर्वत्र भवने एव न हि, अपि तु आतोरणद्वारात् स्थाने स्थाने संस्थापितैः केशरोशीर-कस्तूरी-परिमलाह्लादि-गङ्गाद्यापगापयःपूरित-काञ्चनकलशसान्निध्यानेकगुणीभूतपवित्रताशोभैः निजाभया जितपारिजातप्रभैः कर्पूरागुरुगन्धमिश्रैः परिलम्बमानहरितदूर्वाङ्कुरव्यवस्थितैः कदलीस्तम्भैः परिवर्धमानशोभाः मध्ये मध्ये नवमालिका-माधवी-केतकी-कदम्बादिकुसुमावली-विभूषिताः वीथीमुभयतो विलसन्त्यो मन्दमन्दमरुदुल्लसद्-रसालाशोककिसलयपताकाः लोकानां चक्षूंषि मनांसि च हरन्ति स्म।

तत्र वीथ्यां कुसुमबाहुल्येन वसुमती सुमवती प्रतीयमानासीत्। नासिकाऽमितसन्तोषदायिभिरित्रपटलैः हृद्यता समेधमानाऽऽसीत्। सर्वथा पवित्रे,चेतोहरे, विविधरत्नभूषाविभूषिते, वरवधूपयोगिकुसुमकौशेयपरिवृतकांचनपीठद्वयपरिवर्धितचारुत्वे, मनोरमणीयरमणीगीतिस्वरलहरीरमणीये, परमपावनश्रुति–सुखदश्रुतिनिनदे, समलङ्कृतैः मङ्गलवेषैः विवाहमहोत्सवालोकनाभिलाषागतैः सपर्योत्सुकैर्वासुरैरिव भूसुरैः लसिते विवाहमण्डपे विधिपुरस्सरं श्रीश्रीनिवासः देहकान्त्या लक्ष्मीमिव, ज्ञानदीप्त्या सरस्वतीमिव, तेजस्वितया शर्वाणीमिव स्वीयां मङ्गलानामिकां कन्यकां भूषया विष्णवे इव, मेधया ब्रह्मणे इव तेजसा च शर्वाय इव विपश्चिदपश्चिमाय श्रीमदप्पयदीक्षिताय भार्यात्वेन समर्पयामास।

तदानीं प्रबोधवतीनां युवतीनां ललितेन सुगीतेन तेन गीतेन, धीजुषां श्रुतिजुषां विदुषां ब्रह्मघोषेण, माङ्गल्यशंसितूर्य-मृदङ्गादिविविधवाद्यरवेण, सस्पृहं पश्यन्तीनां किशोरीणाम् अभिनवदम्पतिसंयोगप्रशंसापरकसस्मितवचोमाधुर्य्येण समस्त–मेव तत्रत्यं वातावरणमाह्लादमयं बभूव।

तस्मिन्नवसरे श्रीमदप्पयदीक्षितेन सुलक्षणेभ्यो विच-

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

क्षणेभ्यो ब्राह्मणेभ्यः षट्पञ्चाशत्प्रकारपक्वं सुभोज्यं भोजनं सुवर्णं सुवर्णं च तदा प्रदत्तं यथा न केवलाः कदलीवृक्षा एव, अपि तु ब्राह्मणा अपि अपर्णा बभूवुः।

श्रीश्रीनिवासाध्वरी अपि विबुधतुल्येन वैभवेन समस्ताभिश्च शुभाशंसाभिः समेतां स्वीयां हृद्यानवद्यां धन्यां कन्यां समर्प्य श्रीदीक्षितेन्द्राय परां प्रीतिमापेदे।

एवं सानन्दं सोल्लासं सम्पन्ने विवाहमहोत्सवे परस्परं प्रवर्धमानेन स्नेहातिरेकेण अन्यानपि कतिपयान् वासरान् काञ्चीमध्युष्य प्रीतिपुरस्सरम् अन्योन्यविसृष्टौ श्रीश्रीनिवासश्रीमदप्पयदीक्षितौ स्वीयां स्वीयां निवासभूमिं प्रति जग्मतुः। असह्यमपि पितृवियोगं स्पृहणीयपतिसंयोगेन शमयन्ती मङ्गला श्रीमदप्पयदीक्षितेन समं सानन्दं वैदुष्यपुरस्सरं तारुण्यसुखमनुभवितुमारेभे। एवमन्योन्यवैदुषीप्रीतौ इतरेतरतारुण्योपभोगलाभतृप्तौ अन्यजनादर्शभूतौ तौ दम्पती कमपि वाचामगोचरं पाण्डित्यपूरपूरितलालित्यलसितजीवनामन्दानन्दसन्दोहमनुभवन्तौ भवानीजानिमाराधयन्तौ मखैः मखेश्वरं प्रीणयन्तौ दुर्लभं मानवदेहलाभं सफलीकर्त्तुमारेभाते।

श्रीदीक्षितस्य सर्वतोमुखी प्रतिभा

श्रीमदप्पयदीक्षिते अतिविलक्षणा धर्षितविपक्षिविचक्षणा सुलक्षणा श्लक्ष्णा सर्वतोमुखी च प्रतिभा आसीत्। वयसा विंशतिसमासमोऽपि अनल्पमेधोऽयं दिक्षु विदिक्षु वैदुष्यप्रख्यापने शास्त्रानुशीलने छात्रानुशासने च सर्वेषामेव शेमुषीजुषां विदुषां मानसवासी बभूव। केचन तु एतदीयाय सर्वत्रप्रथिताय यशःपटलाय असूयन्तोऽनेन सह शास्त्रार्थाय बद्धपरिकरा भूत्वा एतदीयं ग्राममप्यागताः। किन्तु ते सर्वे एव पराजिता भूत्वा एतदीयां वशंवदतामुररीकृतवन्तः। वाराणसेयाः कतिचिद् विद्वांसस्तु शास्त्रे एनं जेतुकामाः तत्र गत्वा तदीयं प्रथममेव सविनयं परिचयात्मकं छन्दोबद्धं वाक्यं श्रुतिविषयीविधाय तस्य शिष्या एव बभूवुः। घटना इत्थं लभ्यते—

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एकदा काश्याः केचन पण्डिताः श्रीदीक्षितेन सह शास्त्रार्थाय तदीयं ग्रामं प्राप्ताः। श्रीदीक्षितेन तेषां सर्वेषां हार्दिकमातिथ्यमकारि। तेषां मार्गश्रमो दूरीभूतः, तदा तैः शास्त्रार्थश्रीगणेशकामनया भूतिकाहेतवे श्रीदीक्षितः पृष्टो यत् 'कथयतु भवान् कस्मिन् शास्त्रे कुशलोऽस्ति' इति। श्रीदीक्षितमहोदयो यद्यपि निखिलशास्त्रानुशीलावदातचित्त आसीत्; सर्वत्रैव तस्य मनीषिणो धिषणा निरापदासीत्; सरस्वती तु तदीयवाचि नरीनृत्यते स्म—

साहित्ये सुकुमारवस्तुनि दृढन्यायग्रहग्रन्थिले
तर्के वा मयि संविधातरि समं लीलायते भारती।
शय्या वास्तु मृदूत्तरच्छदवती दर्भाङ्कुरैरास्तृता,
भूमिर्वा हृदयङ्गमो यदि पतिस्तुल्या रतिर्योषिताम्॥

इति श्रीहर्षकविघोषस्तस्मिन्नक्षरश्चरितार्थो भवन्नासीत्; तथापि परमनम्रतापुरस्सरं सस्मितं सविनयं स प्रत्युवाच—

नाहमधीती वेदे न च पठिती यत्र कुत्रचिच्छास्त्रे।
किन्तु दरेन्दुवतंसिनि पुरहिंसिनि भूयसी भक्तिः॥

अयं भावः— नाहं वेदमधीतवान्, न च किमपि शास्त्रमेव पठितवान् किन्तु चन्द्रशेखरे पुरारौ निविडभक्तिमान् अस्मि। पश्यन्तु सुधियः, यत् कियद् आर्जवं कियच्च वैदुष्याहङ्काररााहित्यं प्रतिभाति दीक्षिते प्रतिवचने ? अन्यः कश्चिद् अभविष्यत् तादृशवैदुषीविभवसम्पन्नस्तर्हि न जाने किं किम् अकथयिष्यत्; कियतीञ्च आत्मश्लाघामकरिष्यत्। परन्तु श्रीदीक्षितेन तु नम्रतायाः पराकाष्ठा प्रदर्शिता।

परन्तु प्रत्युत्तररूपेण अनायासेन एव पद्यात् परिमल मिव तन्मुखाद् विनिर्गतममुं श्लोकं निशम्य ते सर्वे एव वाराणसीपण्डिता विस्मिता बभूवुः। श्लोकस्य छन्दोविधानेन, कोमलकान्तया पदावल्या, रसपेशलया शब्दशय्यया, अयत्नजेन चालङ्कारेण तेषां मत्यां श्रीदीक्षितस्य न केवलं काव्यकाननकेश-

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रित्वमेव प्रकटीबभूव, अपितु 'वेदे अधीती', 'शास्त्रे पठिती' इति—स्थलद्वये 'क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्' इति सप्तमीकारकोपस्कारकस्य वार्तिकसूत्रस्य मार्मिकं प्रयोगसौष्ठवमपि तेषामाशु चित्तं चमच्चकार; सहैव चतुर्थे चरणे 'भूयसीभक्ति' रिति शब्दे 'भूयसो' इति भागे पुंवद्भावाभावोऽपि श्रीदीक्षितस्य 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरणीप्रियादिषु' इति पाणिनिसूत्रीयपुंवद्भावविषयकप्रयोगप्रावीण्यमपि तेषां मनसि प्रवेशमासादयामास।

इत्थं श्रीदीक्षितस्य काव्यव्याकरणादिषु शास्त्रेषु निसर्गसिद्धामप्रतिहतप्रसरां विपक्षिवादि-घस्मरां गतिं निभालं निभालं ते काशिकाः पण्डिताः श्रीदीक्षितेन समं वादाय साहसमेव तत्यजुः; स्तावं स्तावं च तं कञ्चित्कालं तत्र सौमनस्यपुरस्सरमुषित्वा यथारुचि यत्र-तत्र तीर्थेषु परिभ्रमन्तः श्रीदीक्षितवैदुषीं च प्रशंसन्तो वाराणसीं निवबृतिरे।

श्रीदीक्षितस्य सर्वोऽपि समयो यजन-याजन-पठन-पाठन-दान-प्रभृतिभिरेव लोककल्याणकरैः कर्मभिः व्यतीतो भवन्नासीत्। यज्ञैर्देवान्, श्राद्धतर्पणैः पितॄन्, आतिथ्यैरतिथीन्, बलिभिर्भूतान् ज्ञानैश्च ब्रह्मनिरतान् ब्राह्मणान् प्रतिदिनं सन्तोषयन् परमपूतकायः श्रीदीक्षितो भासुराणां भूसुराणां समवाये सुराणां समवाये वृहस्पतिरिव शोभते स्म। एतत्कृतस्य ज्योतिष्टोमयागस्य महिम्ना सर्वत्र शान्त्याह्लादसाम्राज्यं बोभूयते स्म। सस्वरं तत्र प्रोच्चार्यमाणानां वेदमन्त्राणामुद्घोषेण, यथाविधि हुतानि परमपावनसुरभीणि हवींषि गृह्णतां यज्ञानलानां परिमलितधूमाभिः ज्वालामालाभिः, अनवरतं वितीर्यमाणविविधास्वादसम्पन्नान्नराशिभिश्च निखिलमेव तत्रत्यं वातावरणं पूतं भूतमासीत्। वेदेषु वेदविहितकर्मसु च श्रद्धोत्पाद एव श्रीदीक्षितानां चरमं लक्ष्यमासीत्। एवमेव सोमयागेन सोमेश्वरं चन्द्रशेखरं प्रीणयन्तस्ते समेषामेव श्रद्धाभाजनं बभूवुः।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कर्मकाण्डप्रकाण्डता

श्रीदीक्षितोद्भूतकर्मकाण्डी आसीत्। कर्मकाण्डावसरे अनेकशोऽनेन अलौकिकचमत्काराः प्रदर्शिताः। एकदा अयं वाजपेययज्ञं कुर्वन्नासीत्। तदानीं वलिप्रदानार्थमानीतानश्वान् दीनानधीरान् नयनविषयीकृत्य दुःखितो भूत्वा यज्ञाधिपतिं प्रार्थयामास यद् 'भगवन्! दीनपशुबलिपूर्णो यज्ञो भवते कथङ्कारं रोचते? वलिनिमित्तमागतानामेतेषां पशूनां दैन्यमधैर्यञ्च दर्शं दर्शं ममामि धैर्यं लुम्पदस्ति। कृपया मदीयं संशयं छिनत्तु भवान्।' इत्येवं प्रार्थयमाने एव श्रीदीक्षिते ते सर्वे एव बलिपशवः प्रसन्नवदनाः प्रसन्नान्तरात्मानश्च ददृशिरे।

तदनु तु प्रसन्नतया आलम्भनं प्राप्तवतां तेषां पशूनां मेदोमांसादिभिः आहुतिं दातुकामं श्रीदीक्षितं निवारयन्तः केचन ब्राह्मणाः तस्य बलिदानकर्मणो हिंसाजनकतावच्छेदकतां नरकावाप्तिप्रयोजकतां समाजदूषकताञ्च साटोपं साधयामासुः। एतस्यां परिस्थितौ श्रीदीक्षितमहोदयो यज्ञेश्वरं प्रार्थयामास यत्स तथा कमपि चमत्कारं प्रदर्शयेत् यथा वेदेषु यज्ञेषु च लोको विश्वासं कुर्यात्। श्रीदीक्षितकर्तृकप्रार्थनया प्रीतो यज्ञपतिः बलीभूतान् आलम्भितांश्च तान् पशून् आकाशे प्रादर्शयत्। सर्वैरेवावालोकि यद् आकाशे देवरूपाः पीताम्बरधारिणो विमानारूढाः पुरुषाः बद्धाञ्जलयः श्रीदीक्षितं स्तुवन्तः कथयन्तः सन्ति यद् 'अध्वरिप्रवर! भवता अस्मानालभ्य अस्मासु महती कृपा कृतास्ति; वयं भवत्सम्पर्कमासाद्य यज्ञपतिहवींषि भूत्वा देवत्वमापन्नाः स्मः; मदीयानां पूर्वजानामेकविंशतिरपि सहास्माभिरेव देवत्वमाप्तवती अस्ति एनेन बलिकर्मणा; तुभ्यं नमोऽस्तु; अनुजानातु भवानस्मान् दिव्यसुखान्यनुभवितुम्।'

आकाशे विमानस्थितानां तेषामिमानि वचांसि श्रावं श्रावं तान् हृद्यानवद्यरूपान् दर्शं दर्शञ्च सर्वे एव बलिनिन्दितारो विस्मयाभिभूताः सन्तो दीक्षितं प्रणेमुः।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

राजसम्मानोपलब्धयः

परमहर्षस्य विषयोऽस्ति एव यत् तात्कालिका राजानो महाराजाश्च अहमहमिकया श्रीदीक्षितस्य सम्मानं कुर्वन्ति स्म। राजकर्तृकः श्रीदीक्षितस्य सम्मानः लक्ष्मीकर्तृकः श्रीसरस्वत्याः सम्मान इवातितरां प्रीतिविषयः।

यदा श्रीदीक्षितमहोदयो निरन्तरं विधीयमानैः यज्ञ-कर्मभिः परमपूततनुरभूत् तदा अध्वरिप्रवरनाम्नापि श्रीदीक्षितं यज्ञदीक्षितं परिचरितुं नैके राजानः 'अहं पूर्वम्' 'अहं पूर्वम्' इति भावनया प्रयतितुमारभन्त। श्रीदीक्षितोपरि श्वेतच्छत्र-धारणे चामीकरदण्डविराजितचामरवीजने वा सर्वे राजानः श्रद्धालवो बभूवुः। सर्वैस्तथा सेवितोऽपि श्रीदीक्षितः। किन्तु श्रीनरसिंहवर्मा श्रीदीक्षितं परिचरत्सु तेषु राजसु प्रवीणतया धुरीणतामाससाद। सानुप्लवेन श्रीनरसिंहवर्मणा धरापतिना सेव्यमानः श्रीदीक्षितः ससुरसमुदायेन शचीपतिना सेव्यमानो बृहस्पतिरिव विरिञ्चिरिव वा सुतरां रराज। तत्सभारत्नानि श्रीभौतिक-चिदम्बर-शुकमुखादयो महाकवयोऽपि विबुधं श्रीदीक्षितं विविधं प्रशशंसुः; तदीयकर्मकाण्डप्रकाण्डतायाश्च अखण्डनीयतां मेनिरे।

श्रीदीक्षिताय असूयालुः शत्रुः

यद्यपि श्रीदीक्षितः कस्मैचिदपि नासूयते स्म; तथापि तस्य शत्रुरिति निशम्य चेखिद्यते चेतः। किन्तु किं क्रियेत? अयं संसारः अतिविचित्रो विद्यते। अत्र गुणोऽपि दुष्धातोः गुण इव दोषो भवति।

वेलूरपुराधीशस्य श्रीचिन्नबोम्मनाम्नो धराधिपतेः सभायां ताताचार्यनामा विलक्षणो विचक्षणोऽकारणमेव श्रीदीक्षितस्य यशश्चन्द्रे कलङ्ककालिमानं द्रष्टुमिच्छति स्म। अत एव स चिन्नबोम्मं राजानमपि श्रीदीक्षितवैपरीत्ये विधातुं सर्वदैव प्रयतते स्म। श्रीदीक्षितस्य सम्मानस्तस्मै मनागपि न

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रोचते स्म। अतः स सदैव श्रीदीक्षितस्य अपाण्डित्यम् अपरिपक्वतां च निरूप्य चिन्नबोम्महृदयपटलात् श्रीदीक्षितस्य श्रद्धेयां मूर्त्तिमपाकर्त्तुं चेष्टते स्म। प्रारम्भे श्रीचिन्नबोम्मः ताताचार्यकथनेन श्रीदीक्षितं बहु नामन्यत। अत एव यदा सर्वे राजानः श्रीदीक्षितं सेवितुं छत्रचामरादिधारणं चक्रुस्तदा अयं ताताचार्यनिवारितः सन् तं न भेजे। किन्तु विश्वस्तजनजिह्वाभ्यः श्रीदीक्षितस्य वैदुषीं श्रावं श्रावं स तस्मिन् बद्धादरो बभूव एव। अपराधक्षमापनपूर्वकं च तेन राज्ञा शिविकया श्रीदीक्षितः स्वपुरमाहूतः। आगतवतो दीक्षितस्य स्वागतं श्रीचिन्नबोम्मो महता संभारेण विधिवैभवाभ्यां च सहाकार्षीत्। सम्पूज्यमानस्य एव श्रीदीक्षितस्य नैपुणीं निभाल्य श्रीचिन्नबोम्मभूपालस्तस्मै राजसभाध्यक्षत्वं प्रदाय तं भृशं सच्चकार। अनेन प्रकारेण श्रीदीक्षितस्य निवासः असूयावतस्ताताचार्यस्य समीपे एव तदाश्रयदातृराजसभे जातः। वराकस्ताताचार्यो महद् दुःखमलभत। किन्तु कुर्यात्तु कुर्यादेव किम्? गूढं दंशावसरं प्रतीक्षमाणो नाग इव सोऽपि भूपालाभिलाषानुवर्त्ती बभूव।

श्रीदीक्षितः परमशैव आसीत्। स सदैव शिवाराधनायामेव प्रकाशं पातयितुमभ्यस्त आसीत्; तस्य स्वाभाविकं कथनमासीत्—

"यावन्नायाति मरणं यावन्नाक्रमते जरा।
श्रद्धामात्रेण सकलैरर्चनीयो हि शङ्करः॥"

किन्तु अस्य इदं तात्पर्यं न ग्राह्यं स इतर इव विष्णुध्रुक् शैव आसीत्; यतो हि स शैवो भूत्वा क्षणमपि विष्णुं विष्णुपूजां वा न निनिन्द; न वा खण्डयामास। स तु सदैव हरिहरयोरभेदममन्यत। यथा हि स कथयत्यपि हरिहरशतके—

"मारमणमुमारमणं फणधरतल्पं फणाधरकल्पम्।
मुरमथनं पुरमथनं वन्दे बाणारिमसमबाणारिम्॥

अपि च तत्रैव—

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

"वस्तां पिशङ्गं वसनं दिशो वा
गरुत्मता यातु ककुद्मता वा ।
निद्रातु वा नृत्यतु वाधिरङ्गं
भेदं न पश्यामि परस्य वस्तुनः" ।

किन्तु शिवभक्तिदूषणपराणां जनानां मुखावरोधाय स कदाचिदपि आलस्यं न करोति स्म । स स्वीयमाशयं विशदीकरोति—

"विष्णुर्वा शङ्करो वा श्रुतिशिखरगिरामस्तु तात्पर्यभूमिः,
नास्माकं तत्र वादः प्रसरति किमपि स्पष्टमद्वैतभाजाम् ।
किन्त्वीशद्वेषगाढानलकलितहृदां दुर्मतीनां दुरुक्तीः,
भङ्क्तुं यत्नो ममायं नहि भवतु ततो विष्णुविद्वेशशङ्का ।"

अत एव च श्रीदीक्षितो हरिहरयोरद्वैतभावनां संरक्षन् हरिनिन्दां न कुर्वन् यज्ञैश्च यज्ञमहिमानं प्रथयन् शिवमाहात्म्यध्वजमुत्तोलयितुमारेभे । श्रीदीक्षितस्य तादृशमनन्यादृशं पाण्डित्यमालोच्य श्रीचिन्नवोम्मभूपस्तस्मिन्ननुदिनं श्रद्धाभावं वर्धयामास । इतश्चात्मानं वैष्णवं मन्यमानो विष्णुभक्तंमन्यो महामानी महाभिमानी शिवध्रुक् ताताचार्यः श्रीदीक्षितस्य राजसभे तादृशं सम्मानमालोक्य तेन समं वैरं वर्धयितुं प्रारेभे । श्रीदीक्षितो जानन्नपि तदीयं दुर्भावं वैरभावं स्वीयसहजदयालुतावशात् विद्याविनयवैभवशालीनतावशाच्च गर्हितचर्ये ताताचार्ये कदापि वक्रदृष्टिर्न बभूव । किन्तु कुटिलचेतास्ताताचार्यो न केवलं शास्त्रार्थे एव श्रीदीक्षितं पराजेतुमकामयत, अपितु सोऽनेकधा साधुचरितस्य सुपण्डितमण्डलमण्डनीभूतस्य श्रीदीक्षितस्य प्राणानपि ग्रहीतुं प्रायतत । स इदमप्यैच्छत् यत्केनापि उपायेन अयं दीक्षितः श्रीचिन्नबोम्मभूपस्य उपेक्षापात्रम् अविश्वासपात्रं च भवेत् येन अयमस्माद् राजसभात् निष्क्राम्येत । इत्थमेकतस्तु श्रीदीक्षितो राज्ञो बहुमानभाजनं भूत्वा राज्ञा सत्क्रियमाणो राज्ञे योगक्षेमौ कामयमानः ससुखं निवसति स्म; अपरतश्च ताताचार्यो नैकविधानि जघन्यानि

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कपटकर्माणि कुर्वन् श्रीदीक्षितस्य अशुभसाधने कृतसङ्कल्पः सचिन्तो वसन्नासीत् ।

एकदा ताताचार्येण दुश्चिन्तितं यदेष दीक्षितो राज्ञे योगक्षेमभरम् आत्मनि गृहीत्वा राजमानभाजनं जातोऽस्ति; तत्कथन्न आभिचारिकप्रयोगेण राजदारान् रुग्णी विधाय दीक्षितमन्त्रशक्त्याः परीक्षा ग्रहीतव्या ? सौभाग्याद् यदि दीक्षितो भूपाङ्गनारोगमपाकर्तुमक्षमो भविष्यति तदाहमेव रोगापहारं कृत्वा राजदृष्टौ दीक्षितापेक्षया महीयान् भविष्यामि; भूपश्च दीक्षितं साधारणमेव ब्राह्मणं मन्यमानस्तमुपेक्षाक्षिभ्यामवलोकयितुमारप्स्यते; साभाध्यक्ष्यमपि च तस्माद् अपहरिष्यतीति । तदनन्तरं समयमवाप्य तेन कस्मैचिद् आभिचारिकाय तान्त्रिकाय विपुलं धनं दत्त्वा स स्वपक्षे कृतः । तस्यैव च साहाय्येन तेन राजदारेषु अतिभयङ्करो जूर्तिरोगः समुत्पादितः । येन सर्वा एव राजवनिताः नितरां निपीडिताः अभूवन् । तासां कष्टमालोकमालोकं विषीदन् भूपो वैद्यान् तदपाकरणाय बहुधनदानपुरस्सरं नियोजयामास । किन्तु यदि वास्तविकः कश्चिद् रोगोऽभविष्यत् तदा तु नूनं ते वैद्यराजाः तमपाकरिष्यन्; परं स तु तान्त्रिकस्य अभिचारप्रयोग आसीत्; अतो वैद्या हताशा भूत्वा भूपस्य सविधे स्वीयमसामर्थ्यं निवेदयामासुः । तैरिदमपि न्यवेदि यद् 'प्रजावत्सल ! अन्तःपुरे कोऽपि स्वाभाविको रोगो नास्ति; अपितु तत्र इत्थं प्रतिभाति यत्केनापि धूर्त्तेन तान्त्रिकेण अभिचारबलेन रोगोत्पादः कृतोऽस्ति । अतः कोऽपि कुशलस्तन्त्रविदेव विपदमेनां निवारयितुं शक्नोति ।' तेषां वचनं निशम्य राजचेतसि श्रीदीक्षितस्य मूर्त्तिः स्थानमलभत ।

ततः प्रणम्य विषण्णवदनेषु गतेषु वैद्येषु भूपिपालः श्रीदीक्षितनिकेतनं गत्वा प्रणम्य तं सर्वञ्चिद्वृत्तजातं निवेद्य यथोचितं कर्तुं प्रार्थयामास । शरणागतवत्सलः श्रीदीक्षितो भूपं सन्तोष्य विसृज्य च ध्यानदृशा ताताचार्यानाचारमालोच्य श्रीमृत्युञ्जयं भक्तजनशङ्करं शङ्करं ध्यायं ध्यायम् अभिचार-

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रयोगोपशमाय जाज्वल्यमानज्वालामालाकुलीकृते वह्निकुण्डे सविधि मन्त्रोच्चारणपुरःसरं हवनं कर्तुमारेभे।

श्रीदीक्षितकृतेनानेन यज्ञकर्मणा राजदाराणां रोगः आकाशकुसुमायितो बभूव। परमप्रीतो विनीतो भूपो विधिना श्रीदीक्षितं सम्पूज्य तस्मिन् द्विगुणातां श्रद्धां ततान; पप्रच्छापि च तं यत्कथयतु भगवन्! ममान्तःपुरे कस्येदं दुश्चेष्टितमस्ति? तदा श्रीदीक्षितः सस्मित तं सर्वं ताताचार्यमनोरथं सूचयामास श्रवणसमकालमेव राजा प्रस्फुरिताधरः कोपकषायितनयनश्च बभूव। किन्तु श्रीदीक्षितस्तं शान्तं विधायावोचत्—'राजन्! अग्रेऽपि ताताचार्यो बहूनि दुश्चेष्टितानि करिष्यति; स भवता समाद्रियमाणाय मह्यमसूयन्नस्ति; अतः सर्वाण्यपि जघन्यानि कृत्यानि कर्तुं प्रयतिष्यते। किन्तु विश्वम्भरस्य श्रीशिवस्य अमोघया दयादृशा स सदैव विफलमनोरथो भविष्यति। भवान् केवलं पश्यतु; तं किमपि न कथयतु; तेन सममित्थं व्यवहरतु यथा स नेदं ज्ञातुं प्रभवेत् यद् भूपतिः मम दुष्कृत्यचेष्टां जानाति। भवता मया च सहनशीलेन भवितव्यमस्ति। यतो हि स यथा यथा मह्यमसूयिष्यति द्रोक्ष्यति वा, तथा तथा मम यशो वर्धिष्यते एव। भूमिपालस्तदीयं तमादेशं शिरसा हारमिव धारयन् ताताचार्यकृतान्यदुश्चेष्टाप्रतीक्षापरो बभूव।

एवं गच्छति काले पुनरेकदा अघायुस्ताताचार्यः अनघस्य विद्वत्तल्लजस्य श्रीदीक्षितस्य प्राणवियोगानुकूलव्यापारोपायं चिन्तयामास। स च शतं स्वर्णमुद्राः दत्त्वा श्रीहरिमन्दिरस्य एकं वैष्णवम्मन्यमर्चकं स्वपक्षे चकार; उवाच च तमेव, यद् हरिदर्शनकामनया यदा श्रीदीक्षितोऽत्र समागच्छेत् तदा त्वया भगवत्प्रसादप्रदानव्याजेन तस्मै गरलबहुलं चरणामृतसंज्ञं तीर्थ-सलिलं प्रदातव्यमस्ति। सोऽपि पापात्मा कतिपयकाञ्चन-मुद्रालोभेन आत्मनं नरके पातयन् स्वीचकार।

इतश्च श्रीदीक्षितः कस्मिंश्चित्पर्वदिने भवानीवल्लभं श्रीशिवमाराध्य श्रीहरिदर्शनेच्छया तस्मिन् मन्दिरे जगाम;

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीहरिञ्च निदध्यौ। तदानीं तत्रत्यः स एव पापी अर्चको, वस्तुतस्तु पूजारिरेव, श्रीदीक्षितमहोदयमालोक्य प्रसन्नमुखस्तस्य समीपमागत्य प्रणम्य च चरणामृतच्छलेन प्रथमत एव सज्जीकृतं गरलसलिलं तस्मै ददौ। समर्पणसमये तदीयः पाणिश्चकम्पे; गरलसलिलबिन्दवोऽपि च केचन भूमौ पेतुः। श्रीदीक्षितः इदं सर्वं वीक्ष्यापि पात्रस्थं तद्गरलसलिलं हस्ते गृहीत्वा श्रीमृत्युञ्जयं शिवं ध्यातुमारेभे। ध्यानसमकालमेव तदीये विमले चेतसि सर्वं रहस्यं स्पष्टं बभूव। स स्मयितुमारेभे। 'गरलमपि श्रीहरिचरणसलिलसङ्गमासाद्य पूतं सत् अमृतमिव पेयमेव' इति मत्वा श्रीशिवं स्मारं स्मारं पश्यत्येव तस्मिन् पूजारौ अर्चके स तत्पपौ। पात्वा च श्रीहरिं प्रणम्य गृहं जगाम। अर्चकः इदं सर्वं दृष्ट्वा अतिविस्मितो बभूव। साधुपरिपीडनरूपापकार्यपश्चात्तापानलसन्तप्तः स स्वयमेव श्रीदीक्षितचरणयोः पतित्वा सर्वं रहस्यं निवेदयन् क्षमां ययाचे। क्षमापारावारो महामनाः श्रीदीक्षितश्च स्मयमानस्तं चक्षमे। यदा चायं वृत्तान्तो भूपेन विदितः तदा स परमविस्मयं लभमानः श्रीदीक्षितस्य वशंवदो बभूव। श्रीदीक्षिताज्ञया च स ताताचार्याय प्रकाशं न मनागपि चुकोप; न वा च तं किमप्युवाच।

वेल्लूरपुरे निवासं कुर्वतः श्रीदीक्षितस्य नियम आसीत् यत् स महत्येव प्रत्यूषे विविधपुष्पपरिमलपूरपूरितोपवनपरिवृते विकसत्कमलकुले विमलजले जलाशये स्नातुं द्वित्रैः शिष्यैः अनुगम्यमानोऽगच्छत्। ताताचार्येण चिन्तितं यद् कस्यचिद् भूत्युपासकस्य पिशाचसेवकस्य साहाय्येन तस्मिन् सरसि रक्तमांसमज्जामेदोभिस्तया विकृतिरुत्पादनीया, यथा दीक्षितः प्रभाते एव तद्ग्रसितो भूत्वा अपावनतामस्पृश्यतां च उपगत्य सर्वग्रामुपेक्षापात्रं भवेत्। एवं विचार्य स एकस्य द्रव्यवशीकृतस्य भूतोपासकस्य सहायतया तन्निर्मलं सरो कुष्ठरोगहेतुभूतदुर्गन्धिपूरितमांसमेदोभिः पूरयित्वा निशीथे एव दूषयामास। इतश्च श्रीदीक्षितो ब्राह्मे मुहूर्त्ते उत्थाय शौचात् निर्वर्त्य स्वीयान्

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

द्वित्रान् शिष्यान् आत्मना सह नीत्वा स्नानाय नित्यमिव तत्सरोवराभिमुखं प्राचलत्। सरसो निकटे गत्वा नासिकाकष्टदायकं चित्तोद्वेजक तीव्रं दुर्गन्धमाघ्राय विस्मयान्वितेन तेन तत्कारणान्वेषणाय स्वीया अन्तेवासिन उक्ताः। अथ यावदेव ते दीपिकामानीय पश्यन्ति तावत्सर्वमेव तत्रत्यं स्थानं दूषितमदृश्यत। श्रीदीक्षितमहोदयः क्षणं ध्यायन् सर्वं कारणं विवेद। ततः श्रीदीक्षितः कस्यचिन्मन्त्रस्य जपमतितीव्रतया कर्त्तुमारेभे। तस्य परिणामोऽयमभवत् यद् भैरवाकारः कश्चिद् भूतराजः सपदि प्रादुर्भूय तत्स्थानं यथापूर्वं विधाय कुपितश्च भूत्वा तथाविधैरेव (यथाविधैः सरो दूषितमासीत्) घृणोत्पोदकैः पदार्थजातैः सरोदूषकस्य अधमाचार्यस्य ताताचार्यस्य भवनं पूरयामास। तत्सहयोगिनः पिशाचोपासकस्य तु शरीरे कुष्ठरोगमेवोत्पादयामास। श्रीदीक्षितमहोदयः तत्स्थानं यथापूर्वं सद् निभाल्य स्नात्वा ध्यात्वा गृहं जगाम। प्रभाते ताताचार्यगेहदोषं निशम्य राजा कौतुकमापन्नः श्रीदीक्षितं पप्रच्छ; सर्वं च रहस्यं विदित्वा श्रीदीक्षिते परमां भक्तिं ताताचार्ये च विरक्तिं भेजे। ताताचार्यं भर्त्सयितुकामो भूपः श्रीदीक्षितेन एव निवारितः।

यथा यथा श्रीदीक्षितस्य यशोभानुः वृद्धिं व्रजन्नासीत्, तथा तथा ताताचार्यस्य मनःकुमुदं परिम्लायदासीत्। सोऽनारतं श्रीदीक्षितापनानाय एव प्रयतमान आसोत्। एकदा राजपरिषदि 'नीलकण्ठ' शब्दस्य अर्थमादाय चर्चा प्रचलिता। तदा ताताचार्यो नीलकण्ठशब्दस्य निन्दापरकमेव अनर्थमर्थं कर्त्तुं प्रवृत्तः। किन्तु श्रीदीक्षितो नेदं सोढुं शशाक; तथा वास्तविकमर्थं श्रीशिवकर्तृकविषपानकथासन्दर्भपुरस्सरं निरूपयामास। यथा हि—समुद्रमथनावसरे समुत्पन्नेन हालाहलेन यदा सर्वं ब्रह्माण्डं भस्मीभवितुमारेभे तदा विष्णुब्रह्मपुरोगैः देवैः प्रार्थितो भगवान् भूतेशः तत् समस्तमेव हालाहलमुत्थाय पपौ। तत्पानसमकालमेव जगज्जननी भवानी विचारयामास यद् यदि गरलमिदं भगवतः उदरे प्रवेक्ष्यति तर्हि तत्र निवसन् श्रीहरिर्दुःखितो भविष्यति;

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीहरेश्चोदरे विद्यमानं सकल चराचरं ब्रह्माण्डं नूनं दुःखितं भविष्यत्येव; एवं सति तु श्रीशिवस्य गरलपानं व्यर्थमेव भविष्यति ब्रह्माण्डनाशात्; इत्येव विचार्य गरलं पिबतः श्रीशिवस्य ग्रीवा तथा गृहीता यथा पीयमानं तद् गरलं गलबिलावरोधात् उदराभिमुखं भवितुं न प्राभवत्; तत्रैव च ग्रीवायामजीर्यत। ग्रीवायामेव गरलस्थित्या तत्र नीलिमाप्याजगाम। तेनैव 'नीलो जातः कण्ठो यस्य स नीलकण्ठ इति' संज्ञां लब्धवान् भगवान् भूतभावनः। अन्यत्किमपि कारणं नास्ति। अतः श्रीशिवस्य ब्रह्माण्डरक्षणहेतुभूतत्वात् तन्नीलकण्ठत्वं भूषणमेव विभावनीयं न तु स्वहृदयकालिम्नः प्रभावाद् दुष्टधिया दूषणमिति साटोपं साधयामास श्रीदीक्षितः।

ताताचार्यः गरलपानेन एव शिवस्य तादृशमसाधारणं महिमानं साधयतो श्रीदीक्षितस्य वचः श्रुत्वा व्यङ्ग्यपूर्वकं श्रीदीक्षितं सतिरस्कारं कथयामास यद् 'महाशय ! शिवेन गरलं न पीतम्; यतो हि गरलं पीत्वा न कोऽपि प्राणितुं शक्नोति। यदि च गरलपानेन एव भवतः श्रीशिवः विश्ववन्दनीयो जातोऽस्ति, तर्हि किं भवानपि गरलं पातुं शक्नोति ? भगवति श्रीशिवे प्रक्षिप्यमाणं कलङ्कपङ्कमपाकर्त्तुकामेन श्रीदीक्षितेन गरलपानं स्वीकृतम्। श्रवणसमकालमेव झटिति कुतश्चित् पूर्वत एव सज्जीकृत्य निहितं गरलमादाय श्रीदीक्षितसमक्षमानीय पानाय ताताचार्येण स सव्यङ्ग्यं प्रेरितः। इदं सर्वं ताताचार्यकुचक्रमालोक्य नरपति श्रीदीक्षितं तत्पानाद् वारयामास। परन्तु श्रीदीक्षितो नरपतिं समाश्वास्य श्रीमृत्युञ्जयं कालकूटपायिनं भवानीजानिं ध्यायं ध्यायम्—

> अरिर्मित्रं विषं पथ्यं दुःखी च सुखशेवधिः।
> अनुकूले जगन्नाथे विपरीते विपर्ययः॥

इति सूक्तिं च पठन् ताताचार्यानीतं तद् गरलं गङ्गासलिलमिव स्मयमानः पपौ। अस्मिन्नवसरे गरलानलोपशमाय श्रीदीक्षितो भवानीवल्लभं प्रार्थयामास। तेन तदा या प्रार्थना

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कृता, सा एव 'शिवमहिमकलिकास्तुतिः' इति नाम्ना ख्यातिमागवती अस्ति। श्रीशिवमहिम्ना श्रीदीक्षितो मनागपि अस्वास्थ्यं न भेजे। भावविह्वलः सन् शिवं स्तुवन् श्रीदीक्षितस्तदानीं सर्वेषां भूपादीनां जनानां साक्षात् श्रीशिवत्वेन श्रद्धापात्रं बभूव। सर्वैः राजपुरोगैः धिक्क्रियमाणस्ताताचार्यो भृशमन्तरात्मना वितप्तो विलज्जश्च बभूव।

एकदा तु ताताचार्येण श्रीदीक्षितस्य हिंसायाः राजभवने एव प्रबन्धः कृतः। स सचिवाग्रणीस्तु आसीदेव। राजकीयमुद्रा अपि तमेव निकषा आसीत्। अतस्तेन राज्ञो हस्ताक्षरं स्वयमेव विधाय मुद्राङ्कितं च कृत्वा सेनापतये आदेशो लिखित्वा दत्तो यद्—'अद्य यामिन्यां श्रीदीक्षितो राजप्रमदाभवनं यदि प्रविशेत् तर्हि पशुमारं स मारणीयः' इति। सेनापतिः इमं राजादेशं पठित्वा अपि आदेशपालने स्वीयमसामर्थ्यं निवेदयामास किन्तु ताताचार्येण मुहुर्मुहुः राजादेशापरिहरणीयतां निरूप्य यथाकथञ्चित् स सज्जीकृत एव। वराकः स विस्मयमानो विविधं च श्रीदीक्षितं विचिन्तयमानः कतिपयान् भटान् नीत्वा तदागमनवधप्रतीक्षापरो बभूव। इतश्च ताताचार्येण एको दूतः श्रीदीक्षितं निकषा प्रेषितः। तेन गत्वा करौ सम्पुटीकृत्य कथितम् यद् 'भगवन्! एकेन परमावश्यकेन केनाप्यन्येन असमाधेयेन कार्येण विवशीभूतो राजा भवन्तं सम्प्रत्येव आह्वयन्नस्ति; कृपा क्रियता' मिति। प्रथमं तु श्रीदीक्षितः असमये निशीथे राजाह्वानं निशम्य शङ्कां चकार; किन्तु राजनि वात्सल्यात् गमनं स्वीकृत्य 'भद्र! त्वं चल; अहमनुपदमागच्छामि' इति कथयित्वा दूतं विसृज्य मार्गसहायं श्रीभगवन्तं धनुर्धरं रुद्रदेवं निध्याय तस्मिन् निविडे तमसि तमेव स्वाभीष्टदेवं मार्गसहायं श्रीशिवं संस्मरन् चचाल। किन्तु यावदेव स राजभवनाङ्गणं प्राप्नोति तावदेव निशितासिधराः गृहीतकरवालाः सैनिका जिघांसया तदभिमुखं धावितुं प्रववृतिरे। तान् घातुकान् आलोक्य तेषां च चेष्टाः अवगत्य कोपकषायितनयनः श्रीदीक्षितो वक्रवीक्षणेन एव तान् स्तम्भयामास। ततस्तान् सैनिकान्

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तत्तत्प्रहारचेष्टाभिरेव स्तब्धीकृत्य सम्भ्रमपुरस्सरं श्रीदीक्षितो राजभवनं प्रविवेश । सहसा तस्मिन् निशीथे श्रीदीक्षितस्य आगमनं निशम्य भूमिपालः ससंभ्रमं प्रियां शय्यां च विहाय तं प्रणम्य तस्मिन् असमये अस्थाने च तदागमनकारणं सादरं प्रपच्छ । किन्तु श्रीदीक्षितेन ध्यानदृशा ज्ञात्वापि आगमनकारणं तु किमपि नोक्तम्; अपितु पृष्टं यत् 'राजन् ! त्वदीया कुशलिता सुरक्षितास्ति न वा ?' यतोहि सम्प्रति दुष्टदुश्चेष्टाभिः किमपि अशुभं घटितमस्ति । शक्तिशालिषु प्रबलाधिकारिषु अमात्येषु द्रढीयांसं विश्वासं निधाय वीतचिन्तो भवसि; इदम् उचितं नास्ति; अथ साम्प्रतं तु शेष्व, अहमपि गच्छामि एव; प्रभाते सवञ्चित् कथयिष्यामि; श्रीशङ्करः सर्वविधं शङ्करिष्यति ।'

श्रीदीक्षितस्तु एतावदुदीर्य राजवचनस्य प्रतीक्षां न कृत्वा सत्वरम् एकाकी एव गतः । किन्तु राजा निद्रां न लब्धवान् । ततः प्रातः समुत्थाय यदा राज्ञा प्रहारोत्सुकाः सेनापतिसहिताः स्वीयाः सर्वे राजभवनरक्षकाः सैनिकाश्चित्रार्पिता इव पाषाणमया इव स्तब्धीभूताः लोचनगोचरीकृताः, तदा तु तस्य विस्मयस्य सीमा एव नावशिष्यत । झटिति स श्रीदीक्षितेन्द्रभवनमागत्य सर्वं निवेदयामास । तदा दयावारिधिः श्रीदीक्षितो भूपं समाश्वास्य तेन सहैव तत्र गत्वा पुनः वात्सल्यपूर्णया दृशा तान् सर्वान् जडीभूतान् सैनिकान् तज्जीवनाशया विलोक्य उज्जीवयामास ।

पुनश्चेतनामागतः सेनापतिः बद्धाञ्जलिर्भूत्वा सैनिकैः सह श्रीदीक्षितस्य चरणयोः पतित्वा अपराधक्षमायाच्ञां चकार । सर्वञ्च ताताचार्यचेष्टितं राजानं श्रावयामास । श्रवणसमकालमेव प्रस्फुरिताधरो राजा ताताचार्यं धूर्तराजं मत्वा तं देशात् निष्कासयितुं मतिं चकार । किन्तु श्रीदीक्षितो नेदं समर्थयामास । स कथयामास यद् 'राजन् ! कालिदासेन कथितमस्ति यद् 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्' । अतस्ताताचार्याय अवसरो देयः साधुतालाभहेतवे । राजापि श्रीदीक्षितानुरोधं मन्यमानो यथापूर्वं व्यवहरन्, किन्तु ताताचार्यं

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

धूर्तं मन्यमानो, नितरां तथा महत्त्वपूर्णानि कार्याणि स्वयमेव निर्वहन् श्रीदीक्षितं च सम्पूजयन् वसुमतीं शास्तुमारेभे ।

श्रीदीक्षितस्य शरणागतशत्रुवात्सल्यम्

यदा श्रीदीक्षितहिंसार्थं स्वीकृतानि सर्वाणि साधनानि असफलानि बभूवुस्तदा ताताचार्येण स्वयमेव श्रीदीक्षितवधाय मतिकारि । एकदा श्रीदीक्षितः स्वाभीष्टदेवताया मार्गसहायस्य महोत्सवावलोकनेन आत्मानं नयनयुगलञ्च पावयितुकामो विरिञ्चिपुरं गतः । तस्मिन्नवसरे ताताचार्योऽपि कांश्चिद् प्रहारपटून् घातुकान् आत्मना सह नीत्वा श्रीदीक्षितजिघांसया एकस्मिन् घोरे कान्तारे पथि तस्य प्रत्यागमनप्रतीक्षापरायणो बभूव । यदा श्रीदीक्षितः मार्गसहायमहोत्सवं दृष्ट्वा शिविकामारूढः परावर्तमान आसीत् तदा ताताचार्यः सहचरैः सह शिविकावाहकान् भाययन् श्रीदीक्षितोपरि आक्रमणं चकार । रजन्यास्तुरीयो याम आसीत् । तस्मिन् निबिडे वृक्षावलीद्विगुणिते च तमसि तां विपत्तिमाकलय्य श्रीदीक्षितः मार्गसहायमेव सस्मार । एकतानचेतसा विहितेन स्तोत्रेण मार्गसहायः प्रीत्या स्वगणान् शिविकारक्षणाय तत्क्षणं प्राहिणोत्; घोरगर्जनान्वितसौदामिनीचाकचिक्येण च तान् सर्वानेव लुण्ठकान् मूर्च्छयामास । एवं विलोक्य विगतशल्यो दीक्षितः तेषां जिघांसूनामुपरि विपत्पातमालोक्य दयया तान् सकरुणया दृशा विलोक्य वीतव्यथान् चकार । ताताचार्यः श्रीदीक्षितस्य एतादृशं प्रभावं दयाभावञ्च दर्शं दर्शं भृशं पश्चात्तापं गतः; करौ च सम्पुटीकृत्य तच्चरणयोः पपात; समस्तापराधानां च कृते क्षमां प्रार्थयामास । तस्य चेतसो विद्वेषाग्निः श्रीदीक्षितस्य शमवारिणा सर्वथा शान्तिमागतः । श्रीदीक्षितोऽपि शुद्धभावेन प्रणमन्तं ताताचार्यं स्नेहदृशा विलोक्य मृदुभाषणेन तस्य हृदयात् लज्जाशल्यं निष्कासयामास । श्रीचिन्नबोम्मभूपः ताताचार्यकर्तृकमात्मसमर्पणादिकमिदं सर्वं वृत्तं विदित्वा नितरां प्रसन्नो बभूव; श्रीदीक्षिते च अपरिमितां भक्तिं बबन्ध ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीदीक्षितस्य सन्ततयः

पण्डितकुलकमलदिवाकरस्य श्रीमदप्पयदीक्षितस्य मरकतवल्ली-मङ्गलाम्बिकानामिके द्वे पुत्र्यौ तथा नीलकण्ठ-उमामहेश्वर-चन्द्रावतंसनामकास्त्रयः पुत्रा आसन् । श्रीदीक्षितेन एतेषां सर्वेषामेव अपत्यानां यथाविधि समयोचिताः संस्काराः कृताः; स्वयमेव च दीक्षापि दत्ता । अत एव ते सर्वे बालका मेधया, दिनचर्यया साधुचर्य्यया च स्वपितरमेव अनुकुर्वन्तो नयनानन्दहेतवो बभूवुः तेषु नीलकण्ठनामा बालको दीपात्प्रवर्तितो द्वितीय दीप इव सर्वथा पितुः प्रतिनिधिर्बभूव । सर्वविधशास्त्रार्थसमरकानने स सदैव सिंहायते स्म ।

श्रीदीक्षितस्य शिष्यप्रीतिः

श्रीदीक्षितः शिष्यस्नेहसागर एवासीत् । स सदैव स्वान्तेवासिनां सर्वविधयोगक्षेमसम्पादने जागरूकोऽतिष्ठत् । विमलविद्यादानेन न केवलं स तेषां ज्ञानपिपासामेव शमयामास; अपि तु भोजनवस्त्रद्रव्याणि च मुक्तहस्तः स्मयमानो वितीर्य तेषामार्थिक-चिन्तासरितमपि शोषयामास ।

इदमीयामद्वितीयां निगमागमान्तं जगाहुषीं वैदुषीं निर्भरां निर्व्याजाञ्च शिष्यप्रीतिं श्रावं श्रावं नानादिग्देशान्तरेभ्यो मेधाविनो विद्यार्थिनः समागत्य एतदीयचरणच्छायायां स्थित्वा स्वहृदयाकाशव्यापकं संशयतिमिरं तदीयोपदेशेन्दुकान्तिपूरेण सानन्दमपाकुर्वन्ति स्म ।

अष्टाविंशतिवर्षदेशीयेन श्रीदीक्षितेन यदा 'शिवार्कमणि-दीपिका' नाम ग्रन्थरत्नं निरमायि, तदा परमप्रीतः श्रीचिन्नबोम्मभूपोऽस्मै कनकपीठे काञ्चनपुष्पटलैः कनकपूजां समर्पयामास । तत्प्रसङ्गे भूपोऽस्मै विपुलां स्वर्णपुष्पराशिं प्रददौ । किन्तु श्रीदीक्षितेन समस्तं तत्कनकमुद्रापटलं 'शिवार्कमणिदीपिका' ग्रन्थपाठकेभ्योऽन्तेवासिभ्यो दत्तम् । अहो धन्यस्तदीयस्त्यागः !

इत्थं निश्चीयते यदस्य नैजे संस्कृतविद्यालये पञ्चशतं

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

छात्राः आसन्। तान् सर्वानियं नियमेन सस्नेहं पाठयति स्म। एतदीयः ज्येष्ठपुत्रो नीलकण्ठदीक्षितः एतदीयशिष्येषु अतिप्रखरबुद्धिर्बभूव। वैयाकरणसिद्धान्तकौमुदी-प्रौढमनोरमा-शब्दकौस्तुभाद्यनेकशब्दशास्त्रीयग्रन्थप्रणेता श्रीभट्टोजिदीक्षितोऽपि अन्ततोगत्वा एतदीयामन्तेवासितामुररीकृतवानासीत्। घटना सेत्थमस्ति—

एकदा श्रीभट्टोजिदीक्षितो लोकाभिरामभक्तजनविपद्विरामरमणीयरामकृतसेतुबन्धयात्रार्थं निर्जगाम। श्रीचिदम्बरं प्राप्य तन्मनसि श्रीमदप्पयदीक्षितस्य दर्शनाभिलाष उदियाय। ततः पुष्पफलपाणिः सश्रद्धं स श्रीदीक्षितस्य गृहं प्रविवेश। तदानीं तत्र श्रीमदप्पयदीक्षितः काँश्चित् स्वशिष्यान् श्रीभट्टोजिलिखितां सिद्धान्तकौमुदीं तल्लिखित 'प्रौढमनोरमा'-व्याख्यानपुरस्सरं पाठयन्नासीत्। श्रीभट्टोजिः सादरं पुष्पफलानि समर्प्य सश्रद्धं प्रणम्य तं तदिङ्गितं च प्राप्य समीपे एव समुपविवेश। श्रीभट्टोजिः स्वीयान् ग्रन्थान् पाठ्यमानान् दर्शं दर्शं नितरां मुमुदे।

पाठोपसंहारसमये श्रीमदप्पयदीक्षितेन कथितं यदेष ग्रन्थकारस्य अभिप्रायो महामुनिपतञ्जलिप्रणीतमहाभाष्यविरुद्धो विद्यते; तेन तत्स्थलमपि निर्दिष्टम्। समीपे तिष्ठन् श्रीभट्टोजिः इदं सोढुं न शशाक; नम्रतापुरस्सरं च ग्रन्थकारस्य अभिप्रायं महाभाष्यसम्मितमेव साधयामास। श्रीमदप्पयदीक्षितेन तदीयसिद्धिप्रकारं खण्डयित्वा पुनः स्वीय एव पक्षः पुष्टिं प्रापितः। पुनः श्रीभट्टोजिरपि स्वपक्षपोषाय प्रयत्नं चकार। एवं रीत्या द्वाभ्यामेव स्वस्वपक्षसमर्थनं विहितम्। एतस्मिन्नेव व्यतिकरे स्मयमानस्य श्रीमदप्पयदीक्षितस्य मुखात् सहसैव विनिर्गतं यद् 'किं त्वमेव भट्टोजिरसि? यद्धि तुभ्यं ग्रन्थकाराभिप्रायो भृशं रोचते?' इति। श्रीभट्टोजिरपि इदमाकर्ण्य करौ सम्पुटीकृत्य 'भगवन्! सोऽहमेवास्मि अल्पमतिः भट्टोजिः' इति कथयित्वा स्वशिरो नमयामास। अथ तु श्रीमदप्पयदीक्षितो भृशं प्रसन्नो बभूव। भट्टोजेः पृष्ठं स्वपाणिना परामृश्य भूयांसं स्नेहं प्रददौ

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तस्मिन्नेव समये श्रीभट्टोजिदीक्षितस्य चेतसि श्रीमदप्पयदीक्षितेन्द्रशिष्यताङ्गीकाराय मतिरुदियाय; प्रार्थयामासापि स तदानीमेव श्रीमदप्पयदीक्षितं यत्ते दर्शनशास्त्रं तं पाठयेयुः। श्रीदीक्षितः सस्नेहं स्वीकृत्य 'मध्वमतखण्डनं' नाम स्वग्रन्थे भट्टोजिं पाठयामास। सेतुबन्धयात्रां (यदर्थं स निर्गत आसीत्) सम्पूर्य श्रीभट्टोजिः पुनः श्रीमदप्पयदीक्षितमुपगम्य सुचिरं तत्र अवस्थाय तं संसेव्य तत्सकाशाच्च न्यायरक्षामणि-परिमलप्रभृतीननेकान् दर्शनशास्त्रीयग्रन्थान् पपाठ।

श्रीमदप्पयदीक्षितेन्द्रस्य आज्ञया चतुर्लक्षणीस्थानां मध्वमतसिद्धान्तानां खण्डनार्थं श्रीभट्टोजिना यथा तत्त्वकौस्तुभो नाम ग्रन्थो व्यरचि; तथैव पूर्वमीमांसारहस्योद्घाटनाय गुरुप्रेरणयैव 'तन्त्रसिद्धान्तदीपिका' अपि विरचितेति न विशयः।

एतदीयपुत्रेण श्रीनीलकण्ठदीक्षितेनापि स्वीयेषु गङ्गावतरण-वैराग्यशतक-शिवरहस्य-शिवलीलार्णव-शिवोत्कर्षमञ्जरीप्रभृतिषु ग्रन्थेषु एतदीयमहिमा गुरुगौरवेण उपवर्णितोऽस्ति। तस्य अन्ये अनेके परश्शताः छात्राः तदीयं यशो दिक्षु विदिक्षु तु वितेनिरे एव।

श्रीदीक्षितस्य दार्शनिकता

श्रीदीक्षितो विलक्षणो दार्शनिक आसीत्। अयं कदाचिदपि क्वचिदपि राद्धान्ते दुराग्रहं नाकरोत्। याथातथ्योररीकरणे अयं क्वापि औदासीन्यं नाप्नोत्। प्रायेण दार्शनिकाः चिन्तनशीलत्वात् भक्तिमन्तो न भवन्ति; किन्तु एष विचक्षणस्तु विलक्षण एव आसीत्। अद्वैतवादरतोऽपि निराकारे निरञ्जने निर्गुणे ब्रह्मणि श्रद्दधानोऽपि एष भवानीशङ्करयोः उपासनया एव जीवनस्य साफल्यमनन्यत। निर्गुणनिष्ठोऽपि सगुणनिष्ठः, ज्ञानवानपि भक्तिमान्, प्रियाद्वैतोऽपि साधितद्वैतोऽयम् इतरेषां विदुषाङ्कृते समन्वयात्मकं प्रशस्तं पन्थानमदर्शयत्।

श्रीबादरायणप्रणीतब्रह्मसूत्रोपरि श्रीश्रीकान्ताचार्य-

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

लिखितस्य भाष्यस्य सारल्यार्थं साराववबोधार्थञ्च श्रीदीक्षितेन या 'शिवार्कमणिदीपिका' लिखिता, तस्यां तेन लिखितमस्ति–

"यद्यप्यद्वैत एव श्रुतिशिखरगिरामागमानां च निष्ठा,
साकं सर्वैः पुराणैः स्मृतिनिकरमहाभारतादिप्रबन्धैः।
तत्रैव ब्रह्मसूत्राण्यपि विमृशतां भान्ति विश्रान्तिमन्ति,
प्रत्नैराचार्यरत्नैरपि परिजगृहे शङ्कराद्यैस्तदेव ॥
तथाप्यनुग्रहादेव तरुणेन्दुशिखामणेः।
अद्वैतवासना पुंसामाविर्भवति नान्यथा ॥"

अत्र श्रीदीक्षितोऽभिप्रैति यद् महाभारतादिपुराणैः सह श्रौतागमानां विश्वासः अद्वैतवादे एव वरीवृत्यते; विश्रमपदानां निर्मलानां भासुराणां ब्रह्मसूत्राणामपि तदेव तात्पर्यमस्ति; प्राचीनाः आचार्याः श्रीमच्छङ्कराचार्यादयश्चापि अद्वैतभावमेव परिपोषितवन्तः सन्ति; अहं (श्रीमदप्पयदीक्षितः) जानामि यदिदं सर्वं सत्यमस्ति; किन्तु अयमद्वैतभावः चन्द्रशेखरस्य जगच्छङ्करस्य श्रीशङ्करस्य अनुग्रहेणैव, कृपयैव, दययैव च प्रादुर्भवितुं शक्नोति इतरथा नैव। श्रीशङ्करानुग्रहोऽपि तदैव लब्धुं शक्यते यदा चिद्रूपया तदीयशक्त्या सहैव स शिवः समाराध्येत। अस्माद्धेतोः अद्वैतभावलाभाय साम्बशिवाराधनं परमावश्यकमेवास्ति।

इदमत्र महद्वैलक्षण्यं विद्यते यदेकस्यां दिशि तु स अद्वैतवादी अस्ति, अपरस्यां च दिशि स साम्बशिवाराधनारूपे द्वैतवादे श्रद्दधाति। वस्तुतस्तु सः शम्भुं निर्गुणब्रह्मत्वेन जानाति; साम्बं च तमेव सगुणं मन्यते। अत एव तस्य अद्वैतद्वैतसमन्वयो निरापद् दरीदृश्यते। एवमेव च निजे जीवनेऽप्ययं 'न कविर्न मुनिर्न देवयोनिः परमात्मा शिव एव केवलोऽहम्' इत्यात्मानं नित्यशुद्धबुद्धब्रह्मरूपं मन्वानोऽपि यागरूपायामखण्डकर्मकाण्डोपासनायां सदैव दृढप्रत्ययो बभूव।

श्रीदीक्षितस्य इयं विशेषता आसीत् यद् धर्मगतायाः साम्प्रदायिकतायाः कृते अयं मनागपि प्रश्रमाश्रयं वा नादात्। यद्यप्यन्ये पण्डिताः साधवस्तदानीमुग्रतया नेत्रनिमीलनपुरस्सरं

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्वं स्वं सम्प्रदायमाद्रियन्ते स्म; एवञ्च इतरसम्प्रदायमनाद्रियन्ते स्म; किन्तु अयं महानुभावः साम्यं साधयन् समन्वये विश्वासं करोतिस्म। शैव-वैष्णवानां पारस्परिककलहनिवारणाय अनेन महान् प्रयत्नोऽकारि। अनेन कदापि श्रीहरिनिन्दा न कृता। यतो हि अयं जानाति स्म यद् 'शिवस्य हृदयं विष्णुः विष्णोश्च हृदयं शिवः'। अत एव हरिहरयोरभेदं मन्यमानः स सदैव उभावेव अपूजयत्; उभयोरेव समादरमकरोत्।

तेन यावता आदरेण यावत्या च श्रद्धया श्रीशिवमाहात्म्यसंदीपिका 'शिवार्कमणिदीपिका' व्यरचि, तावतैव समादरेण श्रद्धाभरेण च श्रीविष्णुमाहात्म्यद्योतकौ 'वरदराजस्तवः' 'श्रीकृष्णध्यानपद्धतिः' इति नामकावपि ग्रन्थौ अलेखिषाताम्। गरिष्ठया निष्ठया तेन श्रीवेदान्तदेशिकविरचितस्य 'यादवाभ्युदयम्' इति नामकस्य कृष्णभक्तिपरस्य ग्रन्थस्योपरि कृष्णमाहात्म्यप्रदर्शिका व्याख्यापि व्यधायि। स हरिहरयोरभेदे दृढीयांसं प्रत्ययं रक्षति स्म। स्वीयैतदभेदभावपोषाय एव तेन 'हरिहरशतकम्' नामैकं स्तोत्रमपि निरमायि। अत्र निदर्शनत्वेन तत्रत्यं श्लोकद्वयमुपस्थापयामि—

मारमणमुमारमणं फणधरतल्पं फणाधरकल्पम्।
मुरमथनं पुरमथनं वन्दे बाणारिमसमबाणारिम्॥

अस्मिन् श्लोके श्रोत्रमनोहरेण शब्दप्रयोगप्रवाहेण क्रमेण विष्णु-शिवयोः साम्यबहुलाक्षरान्तानि विशेषणानि निगदता सता श्रीदीक्षितेन उभयोरेव एककालावच्छेदेन विहिता वन्दना समेषामेव सुधियां सुतरां मनो रमयति। तदीयोऽयं भावो यद् मारमणं विष्णुम्, उमारमणं शिवम्, मुरमथनं विष्णुम्, पुरमथनं शिवम्, बाणारिं विष्णुम्, असमबाणारिं शिवमहं वन्दे इति तदीयमनोवर्तिनीं शैव-वैष्णवसम्प्रदायसमानसम्मानभावनामेव द्योतयतितराम्।

अनयैव हृदयहारिण्या शैल्या श्रीदीक्षितो विष्णुशिवनिष्ठां स्वीयामभेदबुद्धिं स्पष्टतयापि विशदीकरोति—

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वस्तां पिशङ्गं वसनं दिशो वा,
गरुत्मता यातु ककुद्मता वा ।
निद्रातु वा नृत्यतु वाधिरङ्गं,
भेदं न पश्यामि परस्य वस्तुनः ॥

अस्मिन् श्लोके स मुक्तकण्ठं कथयन्नस्ति यन्मदीय इष्टदेवः पीतमम्बरं धारयेत् उताहो दिशो धारयेत्; अर्थात् स पीताम्बरो वा भवेत् दिगम्बरो वा भवेत्; एवमेव स गरुडेन चलेत् उद्वा वृषभेण चलेत्; अर्थात् स गरुडगामी स्यात् उताहो वृषभगामी स्यात्; तथैव स क्षीरसागरे शयीत उद्वा रङ्गे नृत्येत्: अर्थात् स क्षीरशायी भवेत् उताहो स ताण्डवनृत्यं विदधीत; इदं सर्वं तु तस्य इच्छायां निर्भरमस्ति । स स्वेच्छया विहरति, विहरतु नाम । तदीयान् स्वेच्छाङ्गीकृतरूपकर्मभेदान् दृष्ट्वापि अहं तत्र कमपि भेदं न पश्यामि । मम मतौ तु एक एव सः ।

धीधनैरालोकनीयमत्र यद् श्रीदीक्षितेन श्रीहरिहरयोरभेद एव सर्वदा समवालोकि । श्रीहरिहरयोः दृश्यमाना भेदाः एकस्यैव परब्रह्मणो विवर्ताः सन्ति । वास्तविकस्तु तत्राभेद एवेति श्रीदीक्षिताभिप्रायः सर्वानेव ज्ञानधनान् स्थाने एव प्रीणयतितराम् ।

किन्तु श्रीदीक्षितेन यत्र कुत्रापि यदाकदाचिदपि श्रीशिवावमानना अनुभूना, तत्र-तत्र तदा तदा च तेन भगवतः श्रीशङ्करस्य श्रेष्ठतां परमाराधनीयतां च स्वीयैः धिक्कृतपाथोधिवीचिनिचयैः वाचां प्रचारैः संसाध्य स्वीयं शङ्करकैङ्कर्य्यमपि प्रकटीकृतम् ।

तदीयामिमां दृढीयसीं महीयसीं शङ्करभक्तिमालोकमालोकं केचन वैष्णवंमन्या अमान्या मन्दमतयः स्वयं साम्प्रदायिकताकृष्णकलङ्कनिमग्नाः सन्तः तस्योपरि विष्णुद्रोहात्मकसम्प्रदायवादपङ्कं प्रक्षेप्तुं प्रायतन्त । किन्तु श्रीदीक्षितस्य श्रीहरिहरविषयकेण अद्वैतभावानलेन तेषां सर्वोऽपि पङ्कः शुष्कतामगात् ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीदीक्षितस्य तदानीन्तनो

"विष्णुर्वा शङ्करो वा श्रुतिशिखरगिरामस्तु तात्पर्यभूमिः,
नास्माकं तत्र वादः प्रसरति किमपि स्पष्टमद्वैतभाजाम् ।
किन्त्वीशद्वेषगाढानलकलितहृदां दुर्मतीनां दुरुक्तीः,
भङ्क्तुं यत्नो ममायं नहि भवतु ततो विष्णुविद्वेषशङ्का" ॥

इति रूपो डिण्डिमघोषस्तदीयहृदयस्य स्पष्टवादितां ध्वनयति ।

अस्मिन् उद्घोषे तेन न केवलः स्वोपरि प्रक्षिप्यमाणः श्रीविष्णुविद्वेषपङ्क एव अपसारितः, अपितु श्रीशिवदूषणपराणां पण्डितम्मन्यानां नराणाम् अखर्वगर्वखर्वीकरणसमर्थसङ्कल्पोऽपि विहितोऽस्ति । तेन विशदीकृतमस्ति यद् अहन्तु अद्वैतवादी अस्मि । अस्माद्धेतोः 'विष्णु-शिवयोः कतरः गरीयान्' इति विषयमधिकृत्य कदाचिदपि अहं न चिन्तयामि । किन्तु ये मन्दधियो भगवच्छङ्करमाहात्म्यविनिन्दापापपङ्कपूरनिमग्नाः सन्ति, तेषां श्रीशिवविषयकदुरुक्त्युपशमाय एव अहं प्रयत्नं करोमि । अतो मदीयोऽयं श्रीशिवनिन्दोपशामको यत्नः केनापि मन्दमतिना विष्णुविद्वेषत्वेन न मन्तव्य इति ।

एतावता स्फुटं भवति यत् श्रीदीक्षितः कर्मणा परमशैवो भवन् ज्ञानेन सर्वत्र अद्वैतभावं पश्यन् एकं विलक्षणमेव ज्ञानकर्मसमन्वयं वितन्वानो परस्परं विवदमानानां विदुषां परमसत्पथोपदेष्टा आसीत् ।

श्रीदीक्षितस्य दानशीलता

श्रीदीक्षितमहाभागस्य दानशीलता इतरेषां संग्रहपरायणानां विदुषां कृते सत्पथप्रदर्शिका विद्यते । स संग्रही नासीत्; कदाचिदपि जीवने अर्थलोलुपता अर्थपोषणता वा तस्मै नारोचत । अनेकैः राजभिः महाराजैश्च यदृच्छयैव तस्मै विपुलधनराशिरदायि; किन्तु तेन महाभागेन लब्धस्य तस्य सर्वस्य धनस्य वितरणं दीनेभ्यो दरिद्रेभ्यो जनेभ्यो विहितम् ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीचिन्नबोम्मभूपेन तु तस्य कनकाभिषेक एव कृत आसीत्। तस्मात्। समुपलब्धवनकूटेन तेन स्वीये अडय्यप्पलग्रामे भगवतः श्रीशङ्करस्य कैलासनीकाशमाकाशचम्बनचञ्चुरं हिमधवलोपमपाषाणशिलाखचितं दिव्यमणिमण्डितं नयनाभिरामं विपदां विरामं बन्धुरं मन्दिरं निर्मापितमस्ति, यदद्यापि सुदूरादेव भक्तजनानां मनांसि समाहरति। इदं श्रीशिवमन्दिरं श्रीमदप्पयदीक्षितः वेदाकाशशरेन्दु (१५०४) परिमिते शालिवाहनीये शाके वत्सरे निर्मापयामास।

अस्मिन् मन्दिरे सुजटितेन शिलालेखेन प्रत्यक्षं बुद्धिगम्यं भवति यत् पञ्चशतच्छात्राणां कृते सर्वविधसौविध्यानि वितीर्य 'शिवार्कमणिदीपिकादिकं ग्रन्थजातं तानेष पाठयति स्म। श्रीचिन्नबोम्मभूपसमर्पितो निखिलश्चामीकरनिधिरनेन 'शिवार्कमणिदीपिका' पाठकानां विद्यार्थिनां कृते वितीर्ण आसीत्। तदीयोऽयं त्यागो धनिनोऽपि विस्मापयति; पण्डितानां तु कथैव का?

श्रीदीक्षितस्य विलक्षणचमत्कारिता

श्रीमतो दीक्षितमहाभागस्य जीवनं भृशं चेतश्चमत्कारपूर्णमासीत्। तदीयमिदं वैलक्षण्यं दर्शं दर्शं कतिचित्तद्वंशीयास्तत्पुत्रादयस्तं मानवकोटिमतिक्राम्य देवकोटौ स्थापयितुमचेष्टन्त।

किन्तु अहन्तु तं शङ्करं न मत्वा विदग्धं शंङ्करभक्तमेव मन्ये। श्रीशंकरस्य अमोघया अनघया कृपया तेन विस्मयावहा मानसी सिद्धिरवश्यमधिगतासीत् यया मानवाशक्यानि कार्याणि कृत्वा स सर्वेषामेव दृष्टौ देवत्वं प्राप्तवानासीत्।

वस्तुतस्तु मनोवाक्कायकर्मभिः समाराध्यमानो भगवान् भक्तस्य सर्वविधां विपदं विनाश्य अतिक्रान्तमानवबलमपि मनोरथं तथा सम्पूरयति यथा इतरे जनाः तस्मिन् भक्ते देवत्वं निश्चेतुमारभन्ते। श्रीदीक्षितस्यापि विषये इत्थमेव संघटितमस्ति। तदीयजीवनस्य द्वित्राः विस्मयावहा घटनाः अहमत्र

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

उपस्थापयामि—

एकदा श्रीदीक्षितमहोदयो गरीयसा ज्वरेण पीड्यमान आसीत्। तद्वेदनया तस्य गात्राणि कम्पमानानि आसन्। तस्मिन्नेव व्यतिकरे ताताचार्यसहितः श्रीचिन्नबोम्मभूमिपालस्तद्दर्शनकामनया तदीयं द्वारं खटखटाकार्षीत्। महामनाः श्रीदीक्षितः आत्मनानुभूयमानं तं ज्वरं राज्ञा सह करिष्यमाणे वार्तालापे विघ्नं प्रतिबन्धकं वा मत्वा तं समीपवर्तिनि नागदन्तके अवलम्बमाने कस्मिंश्चिद् वस्त्रे समारोप्य वीतव्यथो मुदितमनाः राजस्वागतं चकार। राजा वेपमानं तद् वसनं नयनविषयीकृत्य कारणं ज्ञातुमपारयन् श्रीदीक्षितमेव सप्रश्रयं तत्कम्पनहेतुमप्राक्षीत्। श्रीदीक्षितेन निवेदितं याथातथ्यं निशम्य राज्ञो हृदि संशीतिरुत्पन्ना। तदा श्रीदीक्षितेन कथितं यद् 'राजन्! मम वचसि यदि प्रत्ययो न भवति, तर्हि प्रत्यक्षं पश्यतु। अहमिमं ज्वरमात्मनि गृह्णामि; अथ वस्त्रकम्पो न भविष्यति; दृश्यता' मित्येवं कथयित्वा श्रीदीक्षितेनात्मनि ज्वरो गृहीतः। तदा तु श्रीदीक्षितस्य शरीरं तथैव कम्पितुमारभत यथा प्राग् वस्त्रं वेपमानमासीत्। इदं सर्वं प्रत्यक्षं पश्यतो राज्ञो विस्मयः परमं सीमानं पस्पर्श। तेन प्रार्थितः श्रीदीक्षितः पुनः स्वीयं ज्वरं वस्त्रे नियोजयामास। राजा क्षमां ययाचे; प्रार्थयामास च श्रीदीक्षितं यद् ज्वरं परिहरतु सः। किन्तु 'प्रारब्धकर्मणां भोगादेव क्षयः' इति कथयित्वा स्मयितुमारभत स महाभागः।

अन्यदा यागद्रुहो वक्तुमारभन्त यद् यज्ञे व्यर्थमेव मानवोपयोगिनो भोग्यपदार्थाः वह्निसात् क्रियन्ते। तदा श्रीदीक्षितमहोदयः प्रत्युवाच यद् यज्ञे यानि वस्तूनि श्रीयज्ञेश्वराय येन समर्प्यन्ते तानि सदैव तत्कृते अक्षय्यानि तिष्ठन्ति; यदि विश्वासो न भवेन्मम वचसि तर्हि पश्यन्तु सर्वे भवन्तो यज्ञभगवन्तम्। एवं कथिताः यदा जनास्तत्र दृष्टिं पातयन्ति, तर्हि तत्र अनाविले यज्ञानिले स्वस्वहुतवस्तूनि विलोक्य परमविस्मयान्विताः भूत्वा श्रीदीक्षितं स्तोतुमारभन्त।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एवंविधा अनेका घटनास्तदीयजीवने घटिताः सन्ति; याभिः स लोकदृष्टौ शङ्करो भूतवानसीत्। मम मतो तु स समुपलब्धसर्वसिद्धिः परिपक्वयोगसम्पन्नो विद्वदग्रणीः महापण्डितो महाशैवो महात्मा एव ववृते; न तु परमात्मा शिवः।

श्रीदीक्षितविरचितग्रन्थाः

श्रीमदप्पयदीक्षितेन विविधेषु विविधासु च शैलीषु नानाकाराः शराकाशेन्दवो ग्रन्था विरचिताः सन्ति। तेषां समेषां नामानीमानि सन्ति—

(१) वृत्तिवार्तिकम्, (२) कुवलयानन्दः, (३) चित्रमीमांसा, (४) यादवाभ्युदयव्याख्यानम्, (५-६) नामसंग्रहमाला तद्व्याख्या च, (७-८) वरदराजस्तवः तद्विवरणं च, (९) कृष्णध्यानपद्धतिः; (१०-११) दुर्गाचन्द्रकलास्तुतिः तद्विवरणं च (१२–१३) आदित्यस्तोत्ररत्नम् तद्व्याख्या च, (१४) मयूखावली, (१५-१६) न्यायमुक्तावली तद्व्याख्या च, (१७-१८) नयमयूखमालिका तद्व्याख्या च, (१९) मणिमालिका, (२०) नयमञ्जरी, (२१) सिद्धान्तलेशसंग्रहः, (२२) न्यायरक्षामणिः, (२३) परिमलः, (२४) शिवार्कमणिदीपिका, (२५-२६) रत्नत्रयपरीक्षा तद्व्याख्या च, (२७) शिवाद्वैतनिर्णयः, (२८-२९) पञ्चरत्नस्तुतिः तद्व्याख्या च, (३०-३१) शिखरिणीमाला तथा तद्व्याख्यात्मकः शिवतत्त्वविवेकः, (३२-३३) ब्रह्मतर्कस्तवः तद्विवरणं च, (३४) शिवकर्णामृतम्, (३५-३६) शिवार्चनचन्द्रिका तथा बालचन्द्रिका नामिका तद्व्याख्या, (३७-३८) विधिरसायनं तथा सुखोपयोजिनी नाम्नी तद्व्याख्या, (३९) चित्रपटः, (४०) उपक्रमपराक्रमः, (४१) वैयाकरणनक्षत्रवादावली, (४२) मीमांसानक्षत्रवादावली (४३) वेदान्तनक्षत्रवादावली (४४) रामानुजश्रृङ्गभङ्गः (४५-४६) मध्वतन्त्रमुखमर्दनं तद्व्याख्यात्मकं मध्वमतविध्वंसनं च, (४७) अधिकरणकुञ्चिका, (४८) वीरशैवम् (४९) तप्तमुद्राविद्रावणम्, (५०) गङ्गाधराष्टकम्, (५१) भस्मवादावली,

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

(५२) पादुकासहस्रव्याख्या, (५३-५४) रामायणतात्पर्यसंग्रहः तद्व्याख्यानं च, (५५-५६) भारततात्पर्यसंग्रहः तद्व्याख्यानं च, (५७-५८) शिवध्यानपद्धतिः तद्व्याख्यानं च, (५९) शब्द-प्रकाशः, (६०) शिवपूजाविधिः, (६१) भक्तिशतकम्, (६२) हरिहरस्तुतिः, (६३) दशकुमारचरितसंग्रहः (६४) प्राकृत चन्द्रिका, (६५) निग्रहाष्टकम्, (६६) आत्मार्पणस्तुतिः, (६७) मानसोल्लासः (६८) श्रीविद्यातत्त्वविवरणम् (६९) हरिवंश-सारचरितव्याख्या, (७०) मार्गबन्धुचम्पूः, (७१) मार्गबन्धुपञ्च-रत्नम्, (७२) तान्त्रिकमीमांसा, (७३) अनुग्रहाष्टकम्, (७४) अधिकरणमाला (७५) अधिकरणसारावली (७६) अमरकोश-व्याख्या, (७७) अरुणाचलेश्वरस्तुतिः, (७८) कृष्णध्यानपद्धति-व्याख्या, (७९) जयोल्लासनिधिः, (८०) तत्त्वमुक्तावली, (८१) तिङन्तशेषसंग्रहः, (८२) धर्ममीमांसापरिभाषा, (८३-८४) न्यायरत्नमाला तद्व्याख्या च, (८५) पञ्चस्वरवृत्तिः (८६) प्रबोधचन्द्रोदयटीका, (८७) मतसारार्थसंग्रहः, (८८) मार्गसहायस्तोत्रम्, (८९) वसुमतिचित्रसेनविलासनाटकम्, (९०) विष्णुतत्त्वरहस्यम्, (९१) शान्तिस्तवः, (९२) शिवपुराण-तामसत्वखण्डनम्, (९३) शैवकल्पद्रुमः, (९४) सिद्धान्तरत्नाकरः (९५) स्तोत्ररत्नाकरः, (९६) हंससंदेशटीका, (९७) मार्गसहाय-लिङ्गस्तुतिः, (९८) लक्षणरत्नावलीव्याख्या, (९९) अपीत-कुचाम्बास्तुतिः, (१००-१०१) नयमणिमाला तद्व्याख्या च, (१०२-१०३) आनन्दलहरी तद्व्याख्या च, (१०४) शिवमहिम-कालिकास्तुतिः, (१०५) शिवमहिमव्याख्या चेति ।

ग्रन्थनिर्माणपरिस्थितयः

श्रीदीक्षितस्य समक्षम् एकैकशः एतादृश्यो विविधाः परिस्थितय एव समाजग्मुः याभिः प्रेरितेनानेन तत्तत्परिस्थिति-समाधानसमर्थाः सार्थाः ग्रन्था लेखनीया बभूवुः । प्रायेण एतदी-यानां सर्वेषामेव ग्रन्थानां निर्माणे चाचिन्न काचित् परिस्थिति-रेव कारणं बभूव । विवादग्रस्तविषयस्य समाधानं तद्विषय-

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विवेचकग्रन्थनिर्माणमुखेन एव श्रीदीक्षितः करोति स्म । अत एव तल्लिखितग्रन्थानां संख्या भूयसी जातास्ति । उदाहरणार्थं कतिपयग्रन्थनिर्माणपरिस्थितीः प्रदर्शयामि—

(क) श्रीदीक्षितस्य कनिष्ठपुत्री यदा प्रथमवारम् ऋतुमती बभूव, तदा तया तस्यामवस्थायां शिवपूजायाः औचित्यमनौचित्यञ्च ज्ञातुं श्रीदीक्षितः पृष्टः । अनेन महोदयेन तदीयां निर्भरां शिवभक्तिमाकलय्य तस्यै शिवपूजोपदेशो दत्तः । श्रुत्वा सा प्रसन्नेन मनसा श्रद्धया शिवमाराधयामास; तथा वार्तालापप्रसङ्गे सा पुत्री पित्रा सह जातमिमं वार्तालापं प्रसन्नता-नवीनताभ्याञ्च वशीभूता सती ताताचार्यजायां श्रावयामास; ताताचार्यजाया च अश्रुतपूर्वाम् अनुपदिष्टपूर्वाम् इमां मासिकधर्म्मवतीविहितां शिवपूजां साश्चर्यं स्वपतिं निवेदयामास । सासूयेन ताताचार्येण साश्चर्येण राजकर्णयोः श्रीदीक्षितस्य अयमुपदेशः अधर्मोपदेशत्वेन निवेदितः । यदा राजापि शङ्कमानो द्वितीयदिने सभायां प्रकारान्तरेण श्रीदीक्षितं शिवपूजाभेदान् पप्रच्छ, तदा श्रीदीक्षितः राजमनोभावं विज्ञाय महता विस्तरेण साधयामास यद् कापि नाम परिस्थितिः स्यात्; मनुष्यः कस्यामपि दशायां स्याद्; यदि तदीयं चेतः भक्तिप्रवणं विद्यते, तर्हि स पूजाधिकारी अस्ति; पूजाफलञ्च लभते । यतो हि ईशः अन्तर्वृत्तिरसिको विद्यते; तस्मै बाह्याडम्बरं न रोचते इति । राजा इदमुत्तरं निशम्य परमां प्रीतिमापन्नः श्रीदीक्षितम् इमान् विचारान् ग्रन्थीकर्त्तुं प्रार्थयामास । श्रीदीक्षितोऽपि तत्प्रार्थनया 'शिवार्चनचन्द्रिका' नामानं ग्रन्थं तथा तदीयां 'बालचन्द्रिका' नामिकां व्याख्यां रचयामास ।

(ख) 'शिवार्कमणिदीपिका' निर्माणकारणं तु प्रायेण वदन्ति एव विद्वांसो यद् रात्रौ चिन्नबोम्मभूपालाकारो भगवान् शङ्कर एव एतन्निर्माणाय आदेशं दत्तवानासीत् श्रीदीक्षिताय । प्रातः सभायां चिन्नबोम्मेनापि प्रार्थना कृतासीत् । अत एव श्रीदीक्षितेन 'शिवार्कमणिदीपिका' अलेखि; इति स्फुटमेव स्फुटमतिमताम् ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

(ग) श्रूयते लिखितं च दृश्यते यद् एकदा श्रीदीक्षितेन 'प्रमादावस्थायां मम चित्तं श्रीशङ्कराभिमुखं गच्छति न वेति' स्वचित्तपरीक्षार्थं स्वोन्मादाय धत्तूररसः पीतः । पीत्वा स उन्मत्तो जातः । किन्तु तदवस्थायामपि स श्रीभगवच्छङ्कर-स्तवे एव लीनमना बभूव । तस्यामवस्थायां ये पञ्चाशत् श्लोकाः तन्मुखाद् विनिर्गताः, त एव 'उन्मत्तपञ्चाशत्' अथवा 'आत्मार्पणस्तुतिः' इति संज्ञां लेभिरे ।

(घ) निग्रहाष्टकमिति नामकं स्तोत्रमपि ताताचार्य-प्रेरितानां दुष्टानां घातुकानां निरोधाय एव भीतभीतेन मनसा श्रीदीक्षितेन तत्क्षणमेव निर्माय पठितमासीत् । तत्कालरचितेना-नेन स्तोत्रेण प्रीतो मार्गसहायो भगवान् तं ररक्षापि सत्वरम् ।

एवमेव अन्येऽपि प्रभूतास्तदीया ग्रन्थाः कस्याञ्चिन्न कस्याञ्चित्परिस्थित्यामेव निर्मिताः बभूवुरिति समेषामेव धीजुषां सुसंवादः ।

श्रीदीक्षितस्य तीर्थस्थानावलोकशीलता

श्रीदीक्षितमहोदयस्य हृदये तीर्थस्थानावलोकनोत्कण्ठा सदैव बलवती तिष्ठति स्म । तेन दक्षिणभारते विलसितानि सर्वाण्येव तीर्थस्थानानि लोचनगोचरीकृतान्यासन् । उत्तर-भारतस्य एव नैव, अपितु संसारस्य पुण्यतमां धन्यतमां भक्त-जनमनोरमां सर्वविधश्रेयसीं महसा महीयसीं यशसा गरीयसीं पुरीं वाराणसीं प्रेक्षितुं प्रतीक्षमाण एवायमासीत् यत् तदानीमेव एतदीया द्राक्षारसमुचो वाचो निजश्रवणातिथीचिकीर्षूणां वाराणसेयमनीषिणां समादरान्वितं काशीदर्शननिमन्त्रणमासाद्य श्रीमदन्नपूर्णाविश्वनाथयोरपारमनुग्रहं मन्यमानोऽयं जीवनस्य उपान्त्यकालिकदिनेषु काशीमपि नयनविषयीचकार ।

तत्रायं महाभागो विदुषां छात्राणां च सर्वविधसंशोति-राशिं सूर्यस्तमोराशिमिव अपाकुर्वन् सर्वेषां कण्ठमणिरभूत् । अयं निरन्तरया निरन्तराययया च विधीयमानया श्रीमदन्नपूर्णा-विश्वनाथसपर्यया आत्मानं धन्यधन्यं पूतपूतं कृतकृत्यं च

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चकार।

वाराणस्यामयं महोदयः सर्वत्र श्रद्धामादरं च लभमानो भवानीवल्लभपाणिपल्लवच्छायालिप्सुरेकतानमनाः भवं भावयन् पूजयन् दिनानि यापयन्नासीत्। समायाता महाशिवरात्रिः। तस्यां शिवरात्रौ शिवसमीपे श्रद्धोत्तुङ्गतरङ्गायितहृदयोऽयं शिवं स्तुवन्नासीत्; तत्तदानीमेव निशीथे निमील्यमाननयनेषु इतर-जनेषु जागरूकाय भक्तराजायास्मै श्रीभवानीसहितो भूतभावनो विश्वनाथो दर्शनं ददौ। पुलकायमानशरीरं निरन्तरप्रेमाश्रु–पूरेण गद्गदवचसमेवं सन्तोषयन्नुवाच विश्नाथो यद् 'वत्स! त्वदीयमुद्देश्यं पूर्णतां गतमस्ति। सर्वे एव शिवद्रुहः शिव–माहात्म्यं स्वीकृतवन्तः सन्ति; अथ त्वं स्वग्राममेव गत्वा तत्र कञ्चित् समयमध्युष्य चिदम्बरे श्रीनटराजतेजसि एव विलीनो भव' इत्येवञ्चाभाष्य ध्यानगम्योऽभवच्छिवः। श्रीदीक्षितोऽपि तदाज्ञां पुष्पमालामिव शिरसा धारयित्वा तत्रत्यं पण्डितमण्डल-मापृच्छ्य सस्नेहं सवियोगदुःखं कथङ्कथमपि तैः विसृष्टः काशीतः प्रतस्थे।

श्रीदीक्षितेन्द्रनिर्वाणम्

वाराणसीतो मनसि विश्वनाथनिदेशमाधाय श्रीदीक्षितो विरिञ्चिपुरीमेव समाजगाम। तत्र चिन्नबोम्मभूपेन तीर्थयात्रातो निर्वृत्तस्यास्य भव्यं स्वागतं व्यधायि; तदीयेन च दर्शनेन समस्ततीर्थयात्राफललाभोऽप्यन्वभावि। ततो विरिञ्चिपुरीतो दीक्षितमहाभागश्चिन्नबोम्मप्रभृतिभिः राजभिरनुगतो वेल्लूरपुर–माजगाम। तत्र कञ्चित्कालमुषित्वा पुनः स स्वग्राममडयप्पल वव्राज। स्वीये ग्रामे चिन्नबोम्मप्रभृतिभिरशेषैः राजभिः पूजित-पादः सः स्वायुषोऽन्तिमानि दश वर्षाणि यापयामास। एतस्मिन् व्यतिकरे स सदैव धर्मोपदेशदाने एव व्याप्तो बभूव। सदैव धर्मस्य रहस्योद्घाटने एव लग्नस्तस्थौ। तदनन्तरं स्वीयमन्तिम समयमवेक्ष्य एकस्मिन्ननेहसि श्रीचिदम्बरं संसेवितुं सम्प्रतस्थे।

तत्र श्रीचिदम्बरमन्दिरे तत्रत्यैः सर्वैरेव अर्चकैः सम्मा-

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नितोऽयं मखीन्द्रः ज्ञानप्रकाशसंज्ञकं शान्तमाश्रमपदमध्युवास। तत्र च प्रत्यहं शिवगङ्गापाथसि स्नात्वा त्रैकालिकीं सन्ध्यां समुपास्य श्रीनटराजविग्रहावलोकनावलीनमना भवितुमारेभे। तात्कालिकाः तदीया सूक्तिमुक्ता विदुषां कण्ठहारायितुं सर्वथालं सन्ति। निदर्शनत्वेन एका प्रस्तूयते—

मौलौ गङ्गाशशाङ्कौ करचरणतले कोमलाङ्गा भुजङ्गाः,
वामे भागे दयार्द्रा हिमगिरितनया चन्दनं सर्वगात्रे।
इत्थं शीतं प्रभूतं तव कनकसभानाथ वोढुं क्व शक्तिः,
चित्ते निर्वेदतप्ते यदि भवति न ते नित्यवासो मदीये ?॥

श्रीदीक्षितोऽन्तिमे समये योगलीनो बभूव। क्रमेण योगस्य पराकाष्ठामुपेयुषः समाधिनिष्ठस्य मोक्षावाप्तिसुसज्जितस्य श्रीदीक्षितस्य समीपे तदीयाः पुत्रपौत्रादयः परिवारजना इतरे च तदीया भक्ताः तदाशयं समीहमाना आगत्य तस्थुः।

निर्वाणवेलायां श्रीदीक्षितस्य विशिष्टकृपाभिनिवेशः स्वीयानुजस्य आच्चानदीक्षितस्य पौत्रेष्वन्यतमे नीलकण्ठनाम्नि बालके अभूत्। एतस्य कारणमिदमासीत् यद् एतस्यानुजः आच्चानदीक्षितस्तु एतस्य समक्षमेव कालधर्मं गतवानासीत्। न केवलमेतावदेव, अपि तु आच्चानदीक्षितस्य नारायणाध्वरिनामा सुतोऽपि, यस्य पञ्चपुत्रा अपि जातवन्त आसन्, सपत्नीकः श्रीदीक्षितेषु पश्यत्सु एव कालधर्मं प्राप्तवानासीत्। अतः पितृ-पितामहवियुक्ताः ते सर्वे एव आस्माकीनस्य चरितनायकस्य श्रीदीक्षितस्य प्रिया अभूवन्। किन्तु तेषु नीलकण्ठनामनि तु तदीया विशिष्टैव कृपासीत्। यतो हि सोऽतीव विनीतो विहितसाङ्गवेदाध्ययनो विलक्षणभक्तश्चासीत्। अतएव श्रीदीक्षितमहोदयो निजान्तिमे समये तमेवान्तिके समाहूय तदीयधैर्य-वैदुष्यजिज्ञासया तं प्रष्टुमारेभे; तदानीं तयोरेवमभूदालापः—

श्रीदीक्षितः—**आपदि किं करणीयम् ?**

स सविनयं प्रत्युवाच—**स्मरणीयं चरणयुगलमम्बायाः।**

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीदीक्षितः—**तत्स्मरणं किं कुरुते ?**

सः पुनः सविनयं सादरं प्रत्युवाच—**ब्रह्मादीनपि किङ्करीकरोति ॥**

एवंविधानि वैदुष्यपूर्णानि तदीयानि प्रतिवचांसि श्रुत्वा परमप्रीतः श्रीदीक्षितस्तमाशीराशिभिरभिवर्धयामास; स्वपुत्रेभ्यश्च तदीयामभिभावकतां भूरिशो भावुकतापुरस्सरं समर्पयामास ।

तदानीं तदीयां निर्वाणयात्रां निशम्य व्याकुलायमानमानसा ये जना राजानश्च समागता आसन्, तेभ्यः सर्वेभ्य एव शुभाशिषो वितीर्य तेषां समेषां प्रवर्धमानं सान्द्रं दुःखध्वान्तमपाकर्त्तुं स परमतत्त्वोपदेशरूपं भासुरमात्मज्योतिर्बोधं प्रकाशयामास ।

एतस्मिन्नेव व्यतिकरे आत्मनि स्फुरन्तमात्मानं समनुभवन् संजातश्रीकाशीविश्वनाथ–वचनस्मृतिः श्रीदीक्षितो नैजं महानिर्वाणकालमनुभूय विहगो नीडमिव पुण्यतमं ब्रह्मरन्ध्रं प्रवेष्टुकामो बभूव ।

तदीयं तमन्तिमं कालमाकलय्य तदीयास्त्रयोऽपि श्री–नीलकण्ठादयस्तनूजाः प्रेष्ठपितृविरहसंभावना-समाकुलितहृदयाः अत एवापगतधैर्याः 'तात, किमनुभूयमानमस्ति'? 'तात, किमनुभूयमानमस्ति ?' इति साम्रेडं सरभसंससाध्वसं समनोवेदनं तं प्रष्टुमारेभिरे ।

तेषां स्वतनुजनुषां तां तथाविधां व्याकुलतामालोक्य तेषां बुद्धौ जागतिकसम्बन्धतत्त्वभङ्गुरतां परब्रह्मतत्त्वपरमार्थताञ्च झटिति समासेन च समुद्‌बोधितवतः श्रीदीक्षितस्य वाचि परब्रह्ममन्त्रा इव, इमे शब्दाः प्रादुर्बभूवुः—

तुर्यातीतस्त्रिगुणरहितो नामरूपादिदूरः,
शुद्धाद्वैतामृतजलनिधिप्रोद्यदानन्दसान्द्रः ।
ब्रह्मैवाहं मुकुरहृदयस्स्वच्छचेतास्सुनित्यं,
मूर्त्तस्साक्षी रविरिव सदा भामि पूर्णश्चिदात्मा ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चिदम्बरमिदं पुरं प्रथितमेव पुण्यस्थलं,
सुताश्च विनयोज्ज्वलाः सुकृतयश्च काश्चित्कृताः ।
वयांसि मम सप्ततेरुपरि नैव भोगे स्पृहा,
न किञ्चिदहमर्थये शिवपदं दिदृक्षे परम् ।।

एतदनन्तरन्तु–

आभाति हाटकसभानटपादपद्म,
ज्योतिर्मयो मनसि मे तरुणारुणोऽयम् ।

इत्येतावदेव श्लोकार्धमुदीर्य सपद्येव सरस्वतीचुम्बित-ब्रह्मरन्ध्रः सौदामिनीसंगतबलाहक इव शोभमानो भासुरः श्रीदीक्षितः स्वाराध्यदेवतायाः श्रीचन्द्रशेखरस्य नटराजस्य नीराजनवेलायां चैत्रपूर्णिमायां प्रशान्तभवाभिनिवेशया निर्निमेषया दृशा श्रीचिदम्बरं नटराजं वीक्षमाणस्तस्यैव तुरीये तेजसि संविलीनो बभूव। तदीय तदिदं महद् विलक्षणं ब्रह्मनिर्वाणमक्षिलक्ष्यीकृत्य तत्र समवेताः सर्वे एव भक्तजनाः 'हर हर महादेव' इति घोषयन्तोऽपि दीनाः साश्रुनयनाः निराशाश्च बभूवुः। श्रीनटराजस्य मन्दिरे तमनुध्यायत एव श्रीदीक्षितेन्द्रस्य ईदृशमिमं देहत्यागमुदीक्ष्य सर्वे एव श्रीदीक्षितेन्द्रे द्विगुणितां श्रद्धां वितेनिरे। श्रीदीक्षितेन्द्रेण अन्तिमे क्षणे उच्चारितस्य श्लोकार्धस्य पूर्त्ति कुर्वन् तत्सूनुः श्रीनीलकण्ठः सदीर्घोच्छ्वासमाह—

नूनं जरामरणघोरपिशाचकीर्णा
संसारमोहरजनी विरतिं प्रयाता ।।

ततस्तु श्रीनीलकण्ठादयस्तदीयाः परिवारजना एव नैव, अपितु सर्वे एव आबालवृद्धं जनाः साश्रुपूरं सगद्गदाक्षरं सदैन्यं स्मारं स्मारं सर्वथानवद्यानि श्रीदीक्षितेन्द्रचरितानि स्वीयां स्वीयां सहजां धीरतामपहाय विलपितुमारेभिरे। ततः प्रवृद्धेन श्रीदीक्षितेन्द्रविरहानल-ज्वालामालाजालेन शोषमुपगते इव क्रमेण क्षीणे अश्रुसागरे, श्रीनटराजसन्निधिवशादिव समुन्मिषिते जगदनित्यतावोधे स्मृतिविषयीभूते च श्रीदीक्षितेन्द्रदत्तपर-

Devavani Parishad New Delhi

ब्रह्मतत्त्वनित्यत्वसदुपदेशे धीधनास्तदीयाः श्रीनीलकण्ठादयस्तनूजाः अन्यैरनेकैर्धीधनैश्च दत्तधैर्याः स्वीयं विगलितं धैर्यमवधार्य, जागतिकीमनित्यतां स्वीकृत्य हृदयं च संदृढीकृत्य श्रीपितृचरणस्य श्रीदीक्षितेन्द्रस्य सर्वाण्येव और्ध्वदैहिककृत्यानि सविधि चक्रुः ।

श्रीदीक्षितस्य वंशवृक्षः—



क्रमशः

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चिदम्बरमिदं पुरं प्रथितमेव पुण्यस्थलं,
सुताश्च विनयोज्ज्वलाः सुकृतयश्च काश्चित्कृताः ।
वयांसि मम सप्ततेरुपरि नैव भोगे स्पृहा,
न किञ्चिदहमर्थये शिवपदं दिदृक्षे परम् ॥

एतदनन्तरन्तु–

आभाति हाटकसभानटपादपद्म,
ज्योतिर्मयो मनसि मे तरुणारुणोऽयम् ।

इत्येतावदेव श्लोकार्धमुदीर्य सपद्येव सरस्वतीचुम्बित-ब्रह्मरन्ध्रः सौदामिनीसंगतबलाहक इव शोभमानो भासुरः श्रीदीक्षितः स्वाराध्यदेवतायाः श्रीचन्द्रशेखरस्य नटराजस्य नीराजनवेलायां चैत्रपूर्णिमायां प्रशान्तभवाभिनिवेशया निर्निमेषया दृशा श्रीचिदम्बरं नटराजं वीक्षमाणस्तस्यैव तुरीये तेजसि संविलीनो बभूव । तदीय तदिदं महद् विलक्षणं ब्रह्मनिर्वाणमक्षिलक्ष्यीकृत्य तत्र समवेताः सर्वे एव भक्तजनाः 'हर हर महादेव' इति घोषयन्तोऽपि दीनाः साश्रुनयनाः निराशाश्च बभूवुः । श्रीनटराजस्य मन्दिरे तमनुध्यायत एव श्रीदीक्षितेन्द्रस्य ईदृशमिमं देहत्यागमुदीक्ष्य सर्वे एव श्रीदीक्षितेन्द्रे द्विगुणितां श्रद्धां वितेनिरे । श्रीदीक्षितेन्द्रेण अन्तिमे क्षणे उच्चारितस्य श्लोकार्धस्य पूर्त्ति कुर्वन् तत्सूनुः श्रीनीलकण्ठः सदोर्घोच्छ्वासमाह—

नूनं जरामरणघोरपिशाचकीर्णा
संसारमोहरजनी विरतिं प्रयाता ॥

ततस्तु श्रीनीलकण्ठादयस्तदीयाः परिवारजना एव नैव, अपि तु सर्वे एव आबालवृद्धं जनाः साश्रुपूरं सगद्गदाक्षरं सदैन्यं स्मारं स्मारं सर्वथानवद्यानि श्रीदीक्षितेन्द्रचरितानि स्वीयां स्वीयां सहजां धीरतामपहाय विलपितुमारेभिरे । ततः प्रवृद्धेन श्रीदीक्षितेन्द्रविरहानल-ज्वालामालाजालेन शोषमुपगते इव क्रमेण क्षीणे अश्रुसागरे, श्रीनटराजसन्निधिवशादिव समुन्मिषिते जगदनित्यताबोधे स्मृतिविषयीभूते च श्रीदीक्षितेन्द्रदत्तपर-

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ब्रह्मतत्त्वनित्यत्वसदुपदेशे धीधनास्तदीयाः श्रीनीलकण्ठादयस्त-नूजाः अन्यैरनेकैर्धीधनैश्च दत्तधैर्याः स्वीयं विगलितं धैर्यमव-धार्य, जागतिकीमनित्यतां स्वीकृत्य हृदयं च संदृढीकृत्य श्री-पितृचरणस्य श्रीदीक्षितेन्द्रस्य सर्वाण्येव औध्वंदैहिककृत्यानि सविधि चक्रुः ।

श्रीदीक्षितस्य वंशवृक्षः—



क्रमशः

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

|
यज्ञेशदीक्षितः
|
नीलकण्ठदीक्षितः
|
यज्ञेशदीक्षितः
|
श्रीरामनाथदीक्षितः
|
सुब्रह्मण्यदीक्षितः
|
यज्ञेशदीक्षितः
|
श्रीवैद्यनाथदीक्षितः
|

यज्ञेशदीक्षितः	नीलकण्ठदीक्षितः	सुब्रह्मण्यदीक्षितः

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शुद्धिपत्रम्

(कृपालवः पाठकाः क्वचिन्मुद्रणकाले त्रुटितान् वर्णान् संयोज्य पठितुं प्रार्थ्यन्ते । शुद्धिपत्रे प्रथममशुद्धं रूपं तदनुशुद्धं रूपं, तदनु पृष्ठसंख्या तदनु च पंक्तिसंख्या दीयन्ते ।)

स्वसुतमुखकलावलोकन-स्वसुतमुखकमलावलोकन (१०.११), **रत्नगर्भ**-रत्नगर्भा (११.२७). **श्रीदीक्षितमहोदयन्**-श्रीदीक्षितमहोदयम् (१२.२१), **क्रीडया**-वालक्रीडया (१३.१५), **प्रवीणेन द्विजकुमारेण**-प्रवीणेन केनापि द्विज-कुमारेण (१४.४), **स अति**-सोऽति (१४.१६), **विपक्षी-विपश्चिन्मातंग**-विपक्षिविपश्चिन्मातंग (१५.११), **स्मार्तर्थ-मजातं**-स्मार्तमर्थजातं (१५.२१), **पितृत्वञ्च**-पितृत्वञ्च गुरुत्वञ्च (१५.२३), **पित्रापुत्रयोः**-पितापुत्रयोः (१५.२८), **तन्मत रसन**-तन्मतनिरसन (१६.९), **तामभूतपूर्वा**-तामभूत-पूर्वां (१७.२७), **माहेश्वरा**-माहेश्वराः (१८.१७), **वाचामम-गोचरां**-वाचामगोचरां (१९.५), **श्रीनिवासध्वरि**-श्रीनिवा-साध्वरि (१९.२८), **प्रीतमती**-प्रीतिमती (२०.१७), **पयोधि**-पाथोधि (२०.२१), **श्रीशि एवव**-श्रीशिव एव (२०.२४), **भवद्भ्ः**-भवद्भ्यः (२१.२३), **तदा**-तथा (२३.३), **सन्दोहमनु-भवतौ**-सन्दोहमनुभवन्तौ (२३.१७), **मखैः**-मखैश्च (२३.१७), **तेषां**-यदा तेषां (२४.४), **भूतिका**-भूमिका (२४.५), **अक्षर-श्चरितार्थो**-अक्षरशश्चरितार्थो (२४.१४), **पद्यात्**-पद्मात् (२४.२६), **श्रीदीक्षिऽतोद्धु त**-श्रीदीक्षितोऽद्धु त (२६.३), **श्रावं**-श्रावं श्रावं (२६.२८), **अध्वरिप्रवरनाम्नापि**-अध्वरि-प्रवरं नाम्नापि (२७.८), **निभालं**-निभालं निभालं (२८.१२), **स**-यत्स (२८.२४), **विष्णु**-विष्णुं (२८.२५), **वाणारि**-बाणारि (२८.२९), **विद्वेश**-विद्वेष (२९.१२), **राज्ञे**-राज्ञो (३०.४), **द्विगुणतां**-द्विगुणितां (३१.६), **आत्मनं**-आतमानं

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

(३१.२८), पात्वा-पीत्वा (३२.१२), ग्रीवा तथा-ग्रीवा तया तथा (३४.५), नरपति-नरपतिः (३४-२३), प्रपच्छ-पप्रच्छ (३६.६), सवञ्चित्-सर्वञ्चित् (३६.१२), मतिकारि-मतिरकारि (३७.७), विद्वेशाग्निः-विद्वेषाग्निः (३७.२६), समुपविशेश-समपविवेश (३९.१५), सम्मित-सम्मत (३९.२२), विनिगतं-विनिर्गतं (३९.२६), स्वग्रन्थे-स्वग्रन्थं (४०.५). ब्रह्माणि-ब्रह्माणि च (४०.२५), श्रीमदत्पय-श्रीमदप्पय (४१.१४), प्रश्रमाश्रयं-प्रश्रयमाश्रयं (४१.३०), समुपलब्धवन-समुपलब्धधन (४५.३), शंङ्कर-शङ्कर (४५.२२) भूतवानसीत-भूतवानासीत् (४७.३), विविधेषु-विविधेषु विषयेषु (४७.७), पद्यतिः-पद्धतिः (४७.१३), वसुमति-वसुमती (४८-१७), खण्डसम्-खण्डनम् (४८.१९), चाचिन्न-काचिन्न (४८.२९), तिद्विषय-तद्विषय (४८.३०), शिवार्कममणि-शिवार्कमणि (४९.२६), वदिन्ति-विदन्ति (४९.२७), मन्यमादोऽयं-मन्यमानोऽयं (५०.२५), दिनेषु-वर्षेषु (५०.२६), धारयित्वा-धारयित्वा परदिने (५१.१५), व्याप्तो-व्यापृतो (५१.२७), तदीया-तदीयाः (५२.५), युग्ल-युगल (५२.३०), पाकतुं-पाकतुं च (५३.१२), वेदनं-वेदनं च (५३.२२), सर्विधि-सविधि (५५.६)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वृत्तिः अध्यापनम् । 'आदर्श संस्कृत महाविद्यालय, उरई (जालौन), उ० प्र०'-सीताराम जयराम आदर्श संस्कृत महाविद्यालय, सुमेरपुर, उन्नाव'-बरेली कालेज, बरेली (उ०प्र०)' - 'उत्तरप्रदेशोच्चशिक्षा-विभाग - राजकीयस्नातकोत्तरमहा-विद्यालय'-प्रभृतिस्थानेषु संस्कृता-ध्यापनानन्तरं सम्प्रति नैनीतालस्थ-कुमायूँ विश्वविद्यालये संस्कृत-विभागाध्यक्षः ।

उत्तरप्रदेशसंस्कृत-अकादम्याः कार्य-कारिणीसमितेः सदस्यः ।

रचना:

(प्रकाशिताः)

संस्कृतानुवादकलिका,

संस्कृतनिबन्धरश्मिः,

श्रीमदप्पयदीक्षितचरितम्

(प्रकाश्यमाना) 'धनपाल एवं उनकी तिलकमञ्जरी : एक अत्याधुनिक समीक्षा'

आवासः १९६ बड़ा बाजार, मल्ली-ताल, नैनीताल (उ०प्र०)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

देववाणी-परिषदा प्रकाशिताः संग्रहणीया ग्रन्थाः

१. अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (प्रथमखण्डः)
(सं० डॉ० रमाकान्तशुक्लः) (दुष्प्राप्यः) रु० १५.००
२. अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (द्वितीयखण्डः)
(सं० डॉ० रमाकान्तशुक्लः) रु० ३०.००
३. कर्णभूषणम् (डॉ०सी०आर०स्वामिनाथन्) रु० ५.००
४. देववाणीदर्शनम् (दुष्प्राप्यम) रु० ५०.००
५. भाति मे भारतम् (काव्यम्)
(प्रणेता-डॉ० रमाकान्तशुक्लः) रु० ४०.००
६. श्रीकृष्णचरितम् (महाकाव्यम्)
(प्रणेता-डॉ० रमेशचन्द्रशुक्लः) रु० ३०.००
७. सुगमरामायणम् (महाकाव्यम्)
(प्रणेता-डॉ० रमेशचन्द्रशुक्लः) रु० ३५.००
८. हरविजयस्य साहित्यिकमध्ययनम्
(डॉ० कृष्णकान्तशुक्लः) रु० ६०.००
९. श्रीमदप्पयदीक्षितचरितम् (गद्यम्)
(डॉ० हरिनारायण दीक्षितः) रु० २०.००
१०. भारतस्वातन्त्र्यसंग्रामेतिहासः
(डॉ० रमेशचन्द्रशुक्लः) रु० ३५.००
११. सदाशयसमुच्चयः
(प्रणेता-श्रीटी० वी० परमेश्वर अय्यरः) रु० १०.००
१२. आभाणकमञ्जरी
(प्रणेता-श्री टी० वी० परमेश्वर अय्यरः) रु० १०.००

प्राप्तिस्थानम्
देववाणी-परिषद्, दिल्ली,
६ वाणी-विहार, नई दिल्ली-११००५९

Devavani Parishad New Delhi